(इत्थं आद्यं ब्राह्मणवाक्यं व्याख्याय अनेन वाक्येन वाक्येन उत्तरसंदर्भस्य संगतिमाह - ब्रह्मविदाप्नोति इति) ब्रह्मविद् आप्नोति परम् इति वाक्यं सूत्रभूतं (संग्राहकम् इत्यर्थः। अनेन आद्यवाक्यस्यैव विवरणरूपत्वाद् उत्तरग्रन्थस्य व्याख्यान-व्याख्येय-भावेन अनयोः संगतिः इत्यर्थः।) सर्वस्य वल्क्यर्थस्य। (इत्थम् आद्यवाक्यविवरणरूपम् उत्तरं मन्त्रब्रह्मणवाक्यजातम् इति तात्पर्यमुक्त्वा "सत्यं ज्ञानम्" इति मन्त्रं संक्षेपतोर्थकथनपूर्वकम् अवतारयति - ब्रह्मविद्- इत्यादिना।) ब्रह्मविद् आप्नोति परम् इति अनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणः १) अनिर्धारितस्वरूपविशेषस्य (बृहत्वात् ब्रह्म इति व्युत्पत्तिबलेन अस्ति किमपि महद्वस्तु इति प्रतीयते, न तु तट्टलेन ब्रह्मणः स्वरूपविशेषोऽपि प्रतीयते इति भावः। लक्ष्योद्देशेन लक्षणविधानमिति हि प्रसिद्धिः) सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्य अभिधानेन स्वरूपनिर्धारणाय (सर्वतो व्यावृत्तः यः स्वरूपविशेषः तत्समर्पणे समर्थस्य लक्षणस्य अभिधानेन स्वरूपनिर्धारणाय एषा ऋग् उदाहियते इति संबन्धः।) (सच्चिदानन्द - ननु ब्रह्मैव सर्वम्, न तु ततोऽन्यदस्ति यतः तद्व्यावृत्तिः अभीप्स्यते । बाढम्। तथापि अविद्याकल्पितम् अब्रह्म अप्यस्ति यस्मिन् अज्ञानाद् आत्ममतिः दृढा इति ततो व्यावर्त्य परमार्थस्वरूपसमर्पणसमर्थं लक्षणम्

अभिधित्सितमतः न दोषः) २)अविशेषेण उक्तवेदनस्य (ब्रह्मविद् इत्यनेन अविशेषेण "अस्ति ब्रह्म". "अहं ब्रह्म" इति वेदनद्वयसाधारण्येण उक्तं वेदनं यस्य ब्रह्मणः तस्य इत्यर्थः) ब्रह्मणो वक्ष्यमाणलक्षणस्य (वक्ष्यमाणं लक्षणं सच्चिदानन्त्यरूपं यस्य तस्य इत्यर्थः।) विशेषेण (विशेषेण इत्यस्य विवरणम् अनन्यरूपेण इति। तस्य पर्यवसितम् अर्थमाह - प्रत्यगात्मतया इति) प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय (अहं ब्रह्म इत्येवमाकारेण ब्रह्मणो विज्ञेयत्वाय चैषा ऋग् उदाहियते इति संबन्धः।) ३)ब्रह्मविद्याफलं च ब्रह्मविदो यत्परप्राप्तिलक्षणम् उक्तम्, तत् सर्वात्मभावः (सर्वसंसार-अस्पृष्ट-ब्रह्मस्वरूपभूत-सर्वात्मभावः एव, न अन्यत् स्वर्गादिकम् इत्यर्थः) सर्वसंसारधर्मातीत-ब्रह्मस्वरूपमेव नान्यद् इत्येतत्प्रदर्शनाय (सच्चिदानन्द - परप्राप्तिलक्षणस्य फलस्य किं तद्विशिष्टं फलस्य रूपमिति विशेषरूपप्रतिपादनाय च ऋगभिधीयते) एषा ऋग् उदाहियते। तत् तस्मिन् एव ब्राह्मण-वाक्योक्त-अर्थे एषा ऋग् अभ्युक्ता आम्नाता।

This first statement is a condensed form of the whole valli. The sweat on his nose takes place. What is that Brahman. This is called expectancy. Urgency also is there. In this meaning, the rg is quoted. his mantra is cited. For what purpose? Brahman was presented as something to be known, without elaboration of description. Vriddhatamatvam is sutrita. The word defines itself. But its true nature was not ascertained. So for that purpose, the rg is cited. How do you do? By the mention of a definition. लक्षणप्रमाणाभ्यां वस्तुसिद्धिः। A definition for Brahman? It is definitionless. That is definition. It is capable of presenting. What? The svarupa visesha. What is it? A svarupa that distinguishes it from everything else. Sasnadiman is cow. That which has dewlap. Only cow should have. Then only it will identify a cow. We cannot call H2O water if it is found in anything else. सर्वेभ्यः व्यावर्त्तकम् is lakshanam. दूषणत्रयरहितो धर्मः। अव्याप्त्यतिव्याप्त्यसम्भवरूप-दोषत्रयशून्यम्। अव्याप्ति - लक्ष्यैकदेशावृत्तित्वम्। अत एव गोर्न कपिलत्वम्। Like defining cow as one which is white in colour. Then this definition does not exist in certain cows which are not white. अतिव्याप्तिः च लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम्। अत एव गोर्न शृङ्गित्वं लक्षणम्। Ativyapti is extension of the attributes to things not denoted by the definition. When we define cow as horned animal, the definition goes to buffaloes that have horns but are not cows. असम्भवश्च लक्ष्यमात्र-अवृत्तित्वम्। अत एव गोरेकशफवत्वम् न लक्षणम्। If we define cow as an uncloven hoofs, it does not exist at all in cows. So a cow is defined as one which has sasna or dewlap and camel as one having humpness.

Again, to know that Brahman as. Which Brahman? That which was presented as just "is". as well as "I am". "is" is uktam, said. "am" is soocitam. indicated. Both are known without clarity. It has to be known clearly as the very inner self. It has to be known as not other than myself. Further, about the result also, one needs to know it clearly. It is unlike svarga etc. It is in the form of knowing myself as all that is here. It is not I am total samsari. It is not affected by all attributes of samsara. To show this also, the rg is cited.

सत्यं ज्ञानमनन्तं ब्रह्म

लक्षणवाक्ये विशेषणानां कृत्यम्

(इत्थं मन्त्रम् अवतार्य {तदचः आद्यपाद} तदाद्यपादतात्पर्यमाह - ब्रह्मणः इति। ब्रह्मणः स्वरूपलक्षणार्थकमिदं वाक्यम् इत्यर्थः) सत्यं ज्ञानमनन्तं ब्रह्म इति (सर्वाणि पदानि द्वितीयान्तानि, यो वेद इत्यनेन संबध्यन्ते) ब्रह्मणो लक्षणार्थं वाक्यम्। (लक्षणवाक्यस्थपदानि विभजते - सत्यानि इति। सत्यादिपदत्रयं विशेशणसमर्पकम् इत्यर्थः) सत्यादीनी हि (ब्रह्मपद-समभिव्याहृतानां सत्यादिपदानां बुभुत्सितं ब्रह्म प्रति विशेषणसमर्पक-अभावे ब्रह्मस्वरूप-विशेष-निर्णय-अयोगाद् इति युक्तिसूचनार्थो हि-शब्दः।) त्रीणि विशेषणार्थानि (व्यावृत्यर्थानि) पदानि विशेष्यस्य ब्रह्मणः। विशेष्यं ब्रह्म, विवक्षितत्वाद् वेद्यतया (आद्यवाक्ये वेद्यतया उक्तं ब्रह्म विशेष्यम्। तस्यैव प्राधान्येन अत्र वक्तुम् इष्टत्वाद् इत्यर्थः। न च लक्षणं सजातीय-विजातीय-व्यावर्त्तकम्, विशेषणं तु विशेष्यस्य तत्सजातीयमात्र-व्यावर्त्तकम् इति वक्ष्यति, तथा च लक्षणविशेषणयोः भेदात् कथं लक्षणार्थं वाक्यमिति उपक्रम्य विशेषणाद्यर्थकतया वाक्यं व्याख्यायते इति वाच्यम्। सजातीय-विजातीय-व्यावर्त्तकस्य सतो लक्षणस्य विशेषणस्य इव सजातीय-व्यावर्त्तकत्व-अंशः अपि विद्यते इत्येतावता अत्र विशेषणत्व-व्यवहारस्वीकारेण समानजातीयमात्र-निवर्त्तकत्वरूप-मुख्यविशेषणत्वस्य अत्र अविवक्षितत्वात्। न च एवमपि ब्रह्मणः स्वरूपभूतं सत्यादिकं कथं लक्षणम्? व्यावर्त्तकधर्मस्य एव वादिभिः लक्षणत्व-अभ्युपगमाद् इति वाच्यम्। गौरवेण धर्मत्व-अंशस्य तत्र प्रवेशायोगाद्, व्यावर्त्तकमात्रस्य स्वरूपेपि संभवात्। न च सत्यादेः लक्ष्यब्रह्मस्वरूपत्वात् कथमेकस्यैव लक्षणत्वं लक्ष्यत्वं च संभवति इति वाच्यम्। लक्ष्यस्वरूपस्यापि सतः सत्यादेः ज्ञातस्य इतरव्यावृत्तिबोधोपयुक्ततया लक्षणत्वम्। सत्यादिस्वरूपस्य एव सतो ब्रह्मणः इतरव्यावृत्ततया ज्ञाप्यमानत्वरूपं लक्ष्यत्वम् इत्येकत्रापि रूपभेदेन उपपत्तेः इत्यन्यत्र विस्तारः।)। (सत्यादिपदानां विशेषणविशेष्यभावे लिङ्गमाह - विशेषणेति। नीलं महत्सुगन्ध्युत्पलम् इत्यादौ सत्येव विशेषणविशेष्यभावे समानाधिकरणतया एकविभक्त्यन्तानि नीलादिपदानि प्रसिद्धानि। प्रकृते च सत्यादिपदानि तथाभूतानि। ततः अर्थगतविशेषण-विशेष्यभाव-निबन्धनानि इति गम्यते।) (आ.गिरि - कुतो विशेषण-विशेष्यभाव-प्रतीतिः इत्यत आह - विशेषणेति।) विशेषण-विशेष्यत्वादेव सत्यादीनि एकविभक्त्यन्तानि पदानि समानाधिकरणानि। (सत्यादिपदार्थानां विशेषणत्वप्रसाधनफलमाह - सत्यादिभिश्च इति) सत्यादिभिश्च त्रिभिः विशेषणैः विशेष्यमाणं (संबध्यमानमित्यर्थः) ब्रह्म विशेष्यान्तरेभ्यः निर्धार्यते (व्यावर्त्यते)। (इतरव्यावृत्तिबोधफलमाह - एवं हि इति। यदि ब्रह्म अन्येभ्यः निर्धारितं स्याद् एवं सति, तद्ब्रह्म ज्ञातं विशिष्य निर्णीतं भवति इत्यर्थः) (आ.गिरि - विशेषणविशेष्यभावस्य फलमाह - एवं हि इति) एवं हि तज्ज्ञातं भवति, यद्यन्येभ्यः निर्धारितम्। (बुभुत्सितस्यवस्तुनो विशेषणैः विशेषितः निर्धारणे हि-शब्द-सूचितं दृष्टान्तमाह - यथेति) यथा लोके नीलं महत्सुगन्धि उत्पलमिति।

[This bracketed section can be used to unfold first without reference to Bhashya**:** We first see the direct meaning of the words. It is called vacyartha. If vacyartha is not tenable then you look for implied meaning. Like village on the river. Give me a cup. Cup means coffee. Every

word can have a primary meaning as well as implied meaning. First job is to understand with vacyartha. Then go to lakshyartha. मानान्तरेविरोधे तु मुख्यार्थस्यापरिग्रहे। मुख्यार्थेन अविनाभूते लक्षणा सा प्रकीर्त्तिता।। When a sentence conveys the meaning through direct meaning, vacyartha, that method of conveying is called abhidha vritti. When the sentence conveys its meaning through implied meaning, that method is called lakshana vritti. There are more vrittis. But not necessary here. Here we saw laskhana word before. Don't get confused between the two. Lakshana can be given through either of the above two method. Suppose I describe directly a person, it is through abhidha vritti. If I describe through words giving double meaning etc. it is through lakshana vritti. Here Brahman is defined through which vritti. Here lakshana vritti.

The word satyam means real. Real means what in common parlance? Reflection of my image is unreal and I am real. Snake is unreal and rope is real. The vacyartha of the word satyam is any object in the world that is available for transaction. From that angle any object would be called Brahman. Table is satyam and so it will become Brahman. So it is further defined as anantam. So we have to give up the direct meaning of the word satyam. Table is neither timewise anantam nor placewise or objectwise. So satyam cannot be interpreted as any object in the world. By the proximity of the word anantam, we give up vacyartha. So we go for lakshyartha. But we cannot take any artha as lakshyartha. That meaning should be associated with vacyartha, closer to vacyartha. Give me a drum he did not ask. शक्यसंबन्धे लक्षणा . Like India word will mean people of India. Here word satyam will mean what. Take any object which is the vacyartha of satyam. What do you find in them. There are two amsas viz name and form and "is" . Table is. Bring the table means it is existing table you are asking. In this name and form has limitation. All limitations. It is spatially limited. Also limited timewise also. The "is" amsa has no limitation of any kind. If you break the table, there are pieces. Piece is. Thus the existence is not destroyed. The existence is available with another name and form. If it is converted into saw dust. Saw dust is. Ash is when burnt. Earth is, when mingled with earth. Existence is not limited in timewise. What about placewise limitation. Suppose if it is only with the table, then you can not say that chair is. Nor all of you will become "are not". It is not so. Existence is every where including between intermediary space. In between two object what about? Space is. Only thing is, it is not associated with any name and form. Our eyes have limitation. Eyes can recognise existence only when it is associated with a name and form. (Name and form also can be experienced only when sat is there.) Sat is in manifest form where name and form is there. Sat is in unmanifest form where name and form is not there. Like the light. In between you and me also there is light. But it is not appreciated. So no place wise limitation. It is in everything. So objectwise also no limitation. The anantam. Satyam can mean either name and form or sat amsa. We normally take to vacyartham. But since it is not tenable here due to the word anantam, we have to lakshyartha. It should be connected to vacyartha. What is connected to vacyartha is sat amsa. It is limitless we saw. Brahman is anantam satyam. So it is sat amsa - existence part of any vyavaharika vastu or object that we understand as real. So it is existence that pervades all

names and forms. It does not have any beginning and end. It is anantam. Even before creation, sat is. Time is means sat is. If you say such a time was when sat was not. When that time was, it is. Sat is. Sat is associated with objects in the past and in the future also. So it is free from timewise limitation. This meaning of satyam fits with anantam also.

Brahman is jnanam. Here also go for direct meaning and see if it fits and then go to lakshyartham. What is the vacyartha of jnanam. I say I have knowledge. Immediately you ask, what knowledge? Knowledge of Himalayas. Normal meaning of knowledge is always associated with one name and form or the other, one object or the other. The object is indicated by a thought in the mind. So we can say any knowledge is associated with one thought or the other. Pot knowledge means the name and form of pot in the mind. When no object at all, then we say mind is blank. So the vacyartham of knowledge is vrittijnanam. Here also we cannot take this as jnanam because of the proximity of the word, anantam. Pot knowledge cannot be anantam because, it is neither timewise nor place wise it is anantam. Pot knowledge is born when you see the pot, When you turn this way, pot is gone and cloth is seen. It is cloth knowledge. If external objects are not there, internal objects are there. I am aware of anger in my mind. I am aware of jealousy in my mind. Vrittis always appear and disappear. So since no objective knowledge is anantam, we have to go to lakshyartha. What is connected to vacyartha. There are two amsas in every knowledge. One is thought part and the other is awareness part. Of this, the thought part is name and form which has got limitation. Vritti-amsa has anta. Pot vritti will be as big as pot. It is not all pervasive. It is born and dies. Awareness part of it you take. Pot vritti is, awareness is. Pot vritti goes and cloth vritti comes, awareness is. If no object at all, the blankness is known. Blankness is. Awareness is. So awareness amsa is ananta. It is called cit amsa. Sat amsa of every object is anantam and cit amsa of every knowledge is anantam. Jnanam should indicate cit amsa alone. So satyam jnanam is satcit. This cit also happens to be anantam. In the past conditions of mind also, cit was. Today mind is calm. The present calm state also is known. The conditions have come and gone. But not awareness. Stages in life have come and gone. Awareness is. It is time-wise anantam. It is present in all beings, animals, humans and devas. It is present in inert objects also. In between also. We have a limitation that it can be experienced only when it is associated with a thought or vritti. A thought manifests caitanyam like name and form is manifester of sat. Abhivyanjaka is name and form or thought. Abhivyangya is sat or cit. Where thought is not, caitanyam is in unmanifest condition. Like in table. Even in human who is in coma, cit is unmanifest. In sleep we are all in that condition only. So cit is everywhere either in manifest or unmanifest condition. So placewise anantam. The implied meaning of jnanam is cit. So Brahman is Ananta Satcit. Eternal all-pervading existence conscious is Brahman. Eternal to negate time limitation and all-pervading to negate placewise limitation. In Sanskrit you need only one word, anatam.

Anantam means free of limitations of any kind. So it should not have any form. Any form will limit an object. Since it is free from any form, it has no name also. Naming is in keeping with

form. Male child - give a male name and female child - give female name. So namaruparahitam is anantam. This is placewise anantam. In Brahman, any tense has no meaning because it is anantam. Present indicates it is now and that there is no guarantee of past existence and future existence and so asti is used with 6 vikaras. We know only limited existence limited by past, present, and future. We cannot use any one of them. These are discussed in Upanishad. How do you say Brahman asit. We know only these three tenses. Our buddhi can comprehend only in terms of these three. So for the sake of understanding of initial students, it is used. Brahman is tenseless.

Another type of anantam is vastutah anantam. It is propertywise limitation. Suppose I am human being by my features, automatically other features are excluded. I am not other beings. I am man means not a woman. Manushyatvam limits me and excludes me from everything. If I am tall I am not short. To have certain properties means not to have some others. One negates the other. Goodness also is a limitation because it excludes badness. So Bhagavan cannot have any gunas. If Brahman is free from vastu pariccheda, what property it can have? It is nirgunam. Is Brahman knower, known or knowledge? It cannot be any one of them because one limits the other or negates the other.

If you say sat, then vastu pariccheda will come. is it not? Sat is a property. So will it not limit. If blue it is, it is limited by red or yellow. If pramata it is, it is limited by prameya or pramana. Like that, it is sat, it can be limited by what? What else is there for sat to be limited by? Asat? Asat is it? It is not. So sat does not limit. Anantam means free of limitations arising from time, place and object. It is eternal, all-pervading and propertyless. We have one word anantam. So Brahman is eternal all-pervading and propertyless satcit.

How to know that Brahman? If I give you a technique or method and you practise it and you come to know Brahman, what will Brahman become? it will become object of knowledge. You will be the knower. It will not be anantam. It is knower also, I cannot say. All these three are resolved in Brahman. The adhishthanam in which they are resolved, it is Brahman. How to know it is Brahman. It is called our orientation. Again you are becoming a knower. As a knower whatever you know will be a prameyam. Any attempt to know is to become a knower. It is an obstacle. The teacher's job is to knock of this attempt to know. Then what is the guarantee that such a thing exists when the resolution takes place. You cannot know and you need not know and at the same time it is because it is yourself. Yourself after the resolution of all the three. Vyavaharika "I" is pramata. Minus that, I am Brahman. I that Brahman cannot be known and need not know and should not attempt to know Brahman. I am Brahman.

That Brahman how it would be like. We need not experience that. Daily we experience in sleep. In sleep I am not knower. None of the three exist. In waking state also, when the three resolve, moments of experiences are there. What is required is the owning up of that I minus all vyavharas. Owning up of that I as Brahman is required. Advaita anubhava is not a problem. Advaita jnanam alone is problem.**]**

Role of Adjectives in General

This sentence is for the purpose of revealing, defining Brahman. satyam+ are called svarupa lakshanam because they directly define Brahman. Sometimes indirectly pointed out or defined, like through world. For example, Brahman is that from which the world is born etc. It is called tatastha lakshanam. Who is Rama. I give a description of him by his colour etc. It is svarupa lakshanam. If I say he is son of so and so etc. it is indirect definition.

In order to present the vibhaga of lakshana and lakshya, viseshana-viseshya-bhava is presented first. There is adjective and substantive relationship between the three words here. This is known because there is samanadhikaranyam among the words. They are in apposition. There is a desire to communicate something. The subject is Brahman. It is predicated. All are in apposition. Why any one cannot be substantive. No. Brahman is presented as something to be known. The akanksha is for Brahman only. So it is substantive. Satya etc. are adjectives linguistically. There are two types of adjectives. One is linguistic. Like blue lily. It is svarupa viseshanam. The other is lakshana viseshanam. Svarupa viseshana is an adjective whose meaning abides in the object that is predicated. It distinguishes the object from objects belonging to its own group. From all other lotuses, blue distinguishes this lotus. This svarupa viseshana. It is located in the lotus. Blue is not elsewhere. Abiding in the object, it distinguishes this given object from other objects of its class. The other is lakshana viseshanam. It distinguishes this object from all other objects in the world. It can apply only to one vastu.

Role of satyam jnanam anantam - In Particular

The words satya etc. means etc. is not lightly to be taken. They are adjectives. Noun is Brahman. Viseshya means qualified. What is qualified here is Brahman. It is to be known. Not satyam etc. Here if Brahman is to be meditated upon, Brahman should be in accusative case or satyam jnanam anantam iti - thus iti word would be there. Or as satya etc. meditate - will be there. None of them. There is apposition here. Since there is adjective-substantive relationship. That is why apposition. Vibhakti is always at the end. Pratyayah parasca. All are first case. Satyam is neuter singular. Jnanam is neuter singular. Anantam is also singular neuter. They refer to one vastu. Padanam samanadhikaranyam and padarthanam viseshana-viseshya bhava.

What is the purpose of them? These defining attributes defining Brahman, revealing Brahman, ascertain the Brahman. From what? From all of them. If there are objects that might be indicated by the word Brahman, from all of them. Only in this manner Brahman is known. Only when it is distinguished from everything else, then only it is known. Just as in the world, we see. Lily is understood only when pointed out this way. In a pond many of them are there. You are pointing out to one of them. There are lilies and lilies. How can it be identified. So adjectives help to recognise a given object. You don't say sweet sugar. Very very sweet sugar you don't say. Sugar is sweet. No need of adjective. You can say sweet mango.

(उक्तं विशेषण-विशेष्यभावम् आक्षिपति - ननु इति) (आ.गिरि - नीलत्वं व्यभिचरत् उत्पलं रक्तमपि संभवति इति नीलं विशेषणं घटते, न तथा सत्यत्वादिकं व्यभिचरद्ब्रह्मान्तरं लोके प्रसिद्धम्। ततः सजातीयव्यवच्छेद्यस्य अभावाद् विशेषणविशेष्यभावो न घटते इत्यर्थः।) ननु विशेष्यं विशेषणान्तरं व्यभिचरद् विशेष्यते, (यत्र विशेष्यजातीयं वस्तु विशेषणान्तरं व्यभिचरद्वर्त्तते तत्र विशेष्यजातीयं विशेष्यते विशेषणैः इत्यत्र उदाहरणमाह - यथा इति। उत्पलजातीयं नीलं रक्तं च अस्ति इति कृत्वा नैल्येन विशेष्यते नीलमुत्पलम् इति यथा इत्यर्थः) यथा नीलं रक्तं च उत्पलमिति। (एतदेव प्रपञ्चयति - यदा हि इति। यदा ह्यनेकानि द्रव्याणि एकजातीयान्यनेक-विशेषणयोगीनि च, तदा विशेषणस्य अर्थवत्वम् (स्यादिति शेषः) । (तत्र व्यतिरेकमाह - न हि इति। एकस्मिन्नेव वस्तुनि विशेषणान्तर-अयोगात् हेतोः विशेषणस्य अर्थवत्वं न हि संभवति इत्यर्थः) न हि एकस्मिन्नेव वस्तुनि विशेषणान्तर-अयोगात्। (अत्र उदाहरणमाह - यथा इति। विशेषणान्तरयोगिनः आदित्यजातीयस्य अन्यस्य अभावाद् आदित्यस्य विशेषणमर्थवन्न भवति यथा इत्यर्थः) यथा असौ एकः आदित्यः, (ततः किम्? तत्राह - तथैकमेव इति। ब्रह्मणोऽद्वितीयत्वश्रवणादिति भावः) तथा एकमेव ब्रह्म, न ब्रह्मान्तराणि, येभ्यः विशेष्येत नीलोत्पलवत्।

Objection

How he leads. It is to make you understand. A substantive, negating other attributes from it, is distinguished by given attributes. A blue lily is there. That lily negates all other colours from it and is thus distinguished by blue. When there are many substances belonging to one species is there, and which are subject to taking many different attributes, like colour, fragrance, size etc., then you are constrained to use adjectives. You want one particular lily from the bond. How will you identify? Say fragrant, blossomed, then blue, then big. You have an eye on it. So you use them. There is a necessity for adjectives. There is meaningfulness. Otherwise it will be like white milk. It is formless space or he is harmless sadhu. By place also you can condition the same looking objects. If only one object is there, there is no other viseshana possible. So you don't use adjective in that case. Like one sun. Not son. The adjective one is meaningless. Also round sun.

Thus there are two conditions for using meaningful adjectives.

एकजातीयानि - The objects should belong to a same class. If there are fruits, flowers, books etc. you cannot use the adjective bring the blue one. An adjective can function when it abides in many objects of the same class. By negating other attributes, this attribute can distinguish the given object.

अनेकानि द्रव्याणि - There must be many substances belonging to the same class. Suppose if in a bunch of fruits, there is only one apple, I need not say bring the white apple. Adjective has no purpose. Adjectives abide in many objects. Hence it can distinguish the given object only from other objects of that class. Hence we cannot say bring the white fruit when there are many fruits are there

अनेकविशेषणयोगीनि - The object must be capable of assuming many qualities. If all the apples are white, then also “bring white apple” is meaningless. There must be red apple, green apple etc.

Similarly Brahman is one. No need to qualify Brahman. As there is no need to distinguish it from others. So how do you say these are meant to distinguish Brahman.

(किमत्र सत्याद्यर्थानां समानजातीयमात्रव्यावर्त्तकत्वरूपं मुख्यविशेषणत्वम् आक्षिप्यते किं वा समानजातीय-व्यावर्त्तकत्वमात्ररूपम् औपचारिकम् अपि। न अन्त्यः तस्य इहापि सम्भवात्। न च ब्रह्मणः समानजातीयानां ब्रह्मान्तराणां अभावात् कथं सम्भवति इति वाच्यम्। वस्तुतो ब्रह्मान्तराणां अभावे अपि कल्पितानाम् अव्याकृत-भूताकाश-कालादि-लक्षण-ब्रह्मान्तराणां सत्त्वात् तेषामपि व्यापकत्वरूपवृद्धिमत्वेन ब्रह्मशब्दवाच्यत्व-उपपत्तेः। तथा च ब्रह्मसमानजातीयानाम् अव्याकृतादीनां व्यावर्त्यानां सत्त्वात् सत्याद्यर्थानां समानजातीयव्यावर्त्तकत्वमात्ररूपम् औपचारिकविशेषणत्वं विष्प्रत्यूहम्, यथा बिम्बप्रतिबिन्बभावेन आदित्यस्य कल्पितं नानात्वम् आदाय अम्बरस्थः सविता सत्यः इति सत्यविशेषणस्य जलादौ कल्पित-आदित्य-व्यावर्त्तनेन अर्थवत्वम्। नाद्यः तस्य इष्टापत्तेः इत्याशयेनाह - न इति) न। लक्षणार्थत्वाद् विशेषणानाम् (स्वरूपलक्षणसमर्पकत्वाद् विशेषणपदानाम् इत्यर्थः)। (संग्रहवाक्यं विवृणोति - नायं दोषः इत्यादिना।) नायं दोषः। कस्मात्। (यस्मात्) लक्षणार्थप्रधानानि विशेषणानि। (सत्यादीनि विशेषणपदानि यतो लक्षणरूपार्थपराण्येव, न मुख्यविशेषणपराणि, तथा सति ब्रह्मणः सत्यादिविशेषणैः समानजातीयाद् व्यावृत्तिलाभे अपि प्रकृते विवक्षितायाः सर्वतो व्यावृत्तेः अलाभप्रसङ्गात्, ततश्च स्वरूपविशेषनिर्धारण-अभावप्रसङ्गः इति अर्थः।) न विशेषणप्रधानानि एव। (ननु प्रसिद्धविशेषणानां सजातीयमात्रव्यावर्त्तकत्वं, लक्षणस्य तु सर्वतो व्यावर्त्तकत्वम् इत्ययं विशेष एव कुतः यतोऽत्र सत्यादीनां लक्षणत्वम् उपेत्य विशेषणत्वं प्रतिषिध्यते, न विशेषणप्रधानानि, इत्याक्षिपति - कः पुनः इति) - कः पुनः लक्षण-लक्ष्ययोः विशेषण-विशेष्ययोः वा विशेषः (इति)? (अनुभवमाश्रित्याह - उच्यते इति) उच्यते। सजातीयेभ्यः एव निवर्त्तकानि विशेषणानि विशेष्यस्य। लक्षणं तु सर्वतः (सजातीयाद् विजातीयाच्च इत्यर्थः) एव। (यथा भूतत्वेन सदृशात् पृथिव्यादेः विसदृशाद् आत्मादेः च सकाशाद् आकाशस्य व्यावर्त्तकत्वम् आकाशदातृत्वम् इत्यर्थः) यथा अवकाशप्रदात्राकाशमिति। (ननु सत्यादिवाक्यं विशेषण-विशेष्यसंसर्गपरं समानाधिकरणवाक्यत्वाद् नीलोत्पलनाक्यवदिति, न इत्याह - लक्षणार्थं च इति।) लक्षणार्थं च वाक्यमित्यवोचाम। (देवदत्तस्वरूप-ऐक्यपरे “सोऽयं देवदत्तः” इति वाक्ये व्यभिचारात्, सत्यत्वादिविशेषणविशिष्टस्य ब्रह्मणः सत्यादिवाक्यार्थत्वे विशिष्टस्य तस्य परिच्छिन्नत्वेन आनन्त्य-अयोगात्, वाक्यशेषे च तस्य वागाद्यगोचरत्वप्रतिपादनविरोधाच्च विशिष्टस्य वागादिगोचरत्वनियमात्, तस्मान्न नीलोत्पलवाक्यवत्, न संसर्गपरं सत्यादिवाक्यं किं तु अखण्डैकरसवस्तुपरमिति मत्वा प्रागेव ब्रह्मणो लक्षणार्थं वाक्यमित्यवोचाम इत्यर्थः)

Answer

The answer is that they are meant to define Brahman. They are not mere adjectives. General adjectives do not define an object. नीलत्वम् does not define lily because the attribute of an object itself is not the object. And there are many blue things like blue sky, blue thread etc. Whatever is blue is lily you cannot say. Here the words are no doubt in samanadhikaranyam.

The relationship has to be converted now into lakshana-lakshya bhava. The adjectives here are mainly to define. Bhashyakara first introduced the words as adjectives to help us distinguish how an adjective does the job of vyavarttakam so that we can understand the vyavarttakam that is done by lakshanas also. Having done that job he releases our mind from that example because here there are not many Brahman as asatyam brahma, ajnanam brahma or ajadam brahma to use adjectives for Brahman in the normal sense. The adjectives are being used by us to define Brahman and limit Brahman to them alone. Satyam is Brahman, Jnanam is Brahman and Anantam is Brahman. If they are adjectives in the normal sense, we will have the following problems:

An attributed thing becomes limited to the given attribute like a blue lily cannot be any other coloured lily. It is against anantyam of Brahman.

An attributed thing becomes available for words to describe it. This is against the Sastra that says Brahman is not a vacyartha of any word, by the sruti yato vaco+

Words of a samanadhikarana vakya need not always enjoy the relationship of adjective and substantive as we say vyabhicara or exception in the sentence सोऽयं देवदत्तः। Where they resolve in the svarupa of Devadatta.

Still I have got the same problem. What is the difference between the two types of adjectives? The answer is that the adjectives distinguish one object from all others in the same species. Lakshana viseshanas do so from everything else. Particular species like cow can be defined that distinguishes from all other beings. Like that which gives accommodation is space. So space giving quality distinguishes space from rest of objects Earth etc. are also given accommodation by space only. Formless is space you can not say. Vayu also is formless. Or humpness distinguishes camel from everything else. So vakyarthasya lakshana-lakshya sambandha. So these three adjectives must be applicable only to Brahman.

The use of adjectives can be justified to distinguish an object that is one without a second also. How? When there are possibilities of confusing one to be many. In the example अम्बरस्थः सविता सत्यः "sun in the sky is real". Here is a person who has taken the sun that is reflected in a pool of water as real. With reference to that ignorant, this statement is meaningful. From the standpoint of Brahman, these are meaningless as adjectives.

Why not they mutually qualify. That is not the purpose. Because here Brahman is to be understood. For each word is connected to Brahman because it is viseshyam.

सत्यादिपदानां प्रातिस्विककृत्यविवेचनम् - सत्यमिति अनृताद् विकाराद् व्यावृत्यर्थम्

(सच्चिदानन्द - उत्तरत्र सत्यादीनाम् अन्योन्य-नियम्य-नियामकभावेन ब्रह्मलक्षकत्वं प्रदर्शयिष्यन् इदानीं तेषाम् एकैकशः विशेष्यान्तराद् व्यावृत्तिप्रकारं तावद् दर्शयति।) [आ.गिरि - पुनर् (गोविन्दानन्द - लक्षणादिभावेन विशेषणादिभावस्य त्यक्ततां द्योतयितुं पुनरिति।) विशेषण-विशेष्यभावपक्षम् अवलम्ब्य आह - सत्यादिशब्दाः इति। सत्यं ब्रह्म इत्युक्ते

जाड्यव्यावृत्तिः परिच्छेदव्यावृत्तिष्ट यद्यपि लभ्यते जडस्य परिच्छिन्नस्य सर्वस्य अनृतत्वात्, ज्ञानं ब्रह्म इत्युक्ते च अनृतपरिच्छेदव्यावृत्तिः लभ्यते स्वप्रकाशस्य बाध-अविषयत्वात्, (गोविन्दानन्द - बाधज्ञान-अविषयत्वात्) परिच्छेदग्राहकप्रमाण-अविषयत्वाच्च, लक्षणमपि एकैकं (गोविन्दानन्द - अनेकमिति यावत्) वैकल्पिकम् अदुष्टं, तथापि मन्दमतिव्युत्पादनाय (गोविन्दानन्द - सुखबोधाय) स्यात् (गोविन्दानन्द - त्रितयघटितमेकमेव लक्षणं नानुपपन्नम् इति यावत्)] (ननु प्राक्सत्याद्यर्थानां त्रयाणामपि ब्रह्मविशेषणत्वम् इत्युक्तम्। तदयुक्तम्। सन्निधानात् तेषां परस्पर-विशेषणविशेष्यभाव-संभवादिति, नेत्याह - सत्यादिशब्दाः इति) सत्यादिशब्दाः न परस्परं संबध्यन्ते, परार्थत्वात् (हेतुं साधयति - विशेष्यार्था हि इति। आद्यवाक्ये वेद्यतया उपात्तं ब्रह्म कीदृशमित्याकाङ्क्षायां तत्स्वरूपविशेषसमर्पकत्वेन प्रवृत्तं सत्यादिपदत्रयं ब्रह्मणः एव विशेषणम्, संनिधानाद् आकाङ्क्षायाः प्रबलत्वाद् विशेष्यस्य प्रधानत्वेन विशेषणानां तदर्थत्वात् च, प्रधानसंबन्धस्य अभ्यर्हितत्वाद् विशेषणानां समत्वेन परस्परं गुणप्रधानभावलक्षण-विशेषणविशेष्यभावे विनिगमक-अभावाच्च। अस्मिन् अर्थे वृद्धसंमतिसूचनार्थो हि-ळब्दः। तदुक्तं जैमिनिना - "आनन्तर्यम् अचोदना", "गुणानां च परार्थत्वाद् असंबन्धः समत्वात् स्यात्" इति। आकाङ्क्षाविरुद्धमानन्तर्यं सन्निधानम्, अचोदना अन्वये न कारणं भवति इति आद्यसूत्रार्थः।) विशेष्यार्था हि ते। (परस्परसंबन्ध-अयोगादित्यर्थः) अत ऐकैको विशेषणशब्दः परस्परं निरपेक्षः ब्रह्मशब्देन संबध्यते - सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्मेति । सत्यमिति (तत्र सत्यपदार्थमाह - यद्रूपेण इति। रज्जुत्वेन रूपेण निष्ठितं रज्ज्वात्मकं वस्तु न कदाचिद् रज्जुत्वरूपं परित्यजति इति तत् तेन रूपेण सत्यमिति उच्यते। तथा तदेव रज्ज्वात्मकं वस्तु सर्पत्वेन रूपेण निष्ठितं कालान्तरे तद्रूपं परित्यजति इति तेन रूपेण तदनृतमुच्यते। एतदुक्तं भवति - यद्यस्य कादाचित्कं रूपं तत्तस्य अनृतं, यथा रज्ज्वादेः सर्पादिरूपं, यथा वा मृदादेः घटादिरूपमिति।) यद्रूपेण यन्निष्ठितं तत् तद्रूपं न व्यभिचरति, तत्सत्यम् । यद्रूपेण यन्निष्ठितं तत् तद्रूपं व्यभिचरति तदनृतम् इत्युच्यते। (फलितम् अनृतशब्दार्थमाह - अत इति। रज्ज्वादौ सर्पादेः इव प्रकृतिषु विकाराणामपि कादाचित्कत्वाविशेषादित्यर्थः।) अतो विकारोऽनृतम्, (उक्तयुक्तिसिद्धविकार-अनृतत्व-अनुवादिनीं श्रुतिमाह - वाचारम्भणमिति।) "वाचारम्भणं विकारो नामधेयं (नाम एव इति स्वार्थे तद्धितप्रत्ययः) मृत्तिका इत्येव सत्यम्" (छा.उप ६.१.४)। (घटशरावादि-विकारो नामधेयं नाममात्रम्, अनृतमिति यावत्। तत्र हेतुः वाचा इति। विकारसत्यत्वस्य वागालम्बन-मात्रत्वात्, कारणसत्वव्यतिरेकेण दुर्निरूपत्वाद् इत्यर्थः। च एवमर्थकल्पनायां मानाभाव इति वाच्यम्। कारणमात्रसत्यत्व-अवधारणस्य एव मानत्वात्।)। ("एवं सोम्य स आदेशो भवति" इति दार्ष्टान्तिकश्रुतिम् अर्थतः पठति - एवं सदेव इति। आदिश्यते उपदिश्यते इत्यादेशः। परमात्मा सच्छब्दवाच्यः एवं मृदादिवत्सत्यं परमार्थो भवति ब्रह्म। विकारस्तु प्रपञ्चो मृद्विकारवद् अनृत एव इत्यर्थः।) एवं सदेव सत्यम् (गाविन्दानन्द - सदेव सौम्य इति, तत्सत्यमिति अनयोः एकवाक्यत्वेन एतत्) इत्यवधारणात्। (एवं विकारस्य अनृतत्वं कारणस्य सत्यत्वं च प्रसाध्य सत्यविशेषणफलमाह - अत इति। विकारस्य सत्यत्व-अभावादित्यर्थः) अतः सत्यं ब्रह्म इति ब्रह्म विकाराद् निवर्त्तयति।

Meaning of Satyam

The words satyam etc. do not qualify each other since their purpose is to describe Brahman. But the characteristic of them is that the viseshya of satya is not different from the viseshya of jnanam and the viseshya of anantam is not different from the viseshya of the other two. Satyam Brahma is Jnanam Brahma and so on. This is not so in the case of blue fragrant big lily like blue lily is not blue big lily. This is so because the viseshya is one only here. Hence it is said they are committed to defining viseshya.

These words therefore are not mutually connected but through Brahman. Brahman is to be understood. So they are connected to Brahman. That is all. They are meant for defining Brahman, the viseshya. We are trying to understand Brahman. Hence it is said. Keeping Brahman as viseshya, then we can connect them through Brahman. They are directly connected to Brahman without mutual expectancy among them.

First he takes up satyam. What is satyam? Satyam is that which does not give up its svarupa at any time. In whatever form a thing is ascertained, that form does not give up that ascertained nature. When I define an object in a certain manner and that object if it exhibits a different character later, it is not satyam. This is commonly understood meaning of satyam. In other words, a thing is said to be satyam when it does not change the nature that is ascertained to be its own. If you ascertain the atma to be waker, what about dreamer. If you ascertain atma to be doer, what about enjoyer and so on. So they are all not real. The opposite is anrtam. There is a jump here. Therefore, any vikara, any karya like pot is anrtam. Any created object, anything that has a form, is anrtam because the form changes. We cannot call it satyam.

An effect is not satyam, is unreal for the following four reasons:

It does not have any independent existence apart from the cause like pot

The cause existed before the effect, will exist after the effect is gone and continues to exist even when the effect is. The word satyam is appropriated by cause.

The cause pervades all its effects in whatever form they are, whether pot, kapala or powder whereas effect changes its form.

There is no corresponding object for the word effect, or pot.

He quotes the sruti. This karya, pot's existence is dependent only on the name which is centred on tongue. Form itself is referred by name. Besides the name there is nothing. What is there is only karanam and the word pot hangs. Any karyam becomes anrtam. This is called mithya. This entire jagat was sat alone. That sat vastu alone is satyam. Satyam is ontological term. What is its reality. It is satyam. Sat is satyam. The cause that is sat, So karanam eva satyam. Example also proves clay is satyam. So sat, the karanam is said to be satyam. So vikara is anrtam. That is the conclusion. When satyam is used for Brahman, and satyam being not a karyam, Brahman is released from being a karya. Brahman is second case.

ज्ञानविशेषणस्य कृत्यम् - ज्ञानमिति ज्ञप्तिमात्रम्, न ज्ञानकर्तृत्वार्थकम्

(ननु सत्यविशेषणेन ब्रह्मणो विकाराद् व्यावृत्तिसिद्धौ अतः परिशेषात् कारणत्वं प्राप्तं चेत्, अस्तु, को दोषः? तत्राह - कारणस्य इति) अतः कारणत्वं प्राप्तं ब्रह्मणः। कारणस्य च १) कारकत्वम् (कर्त्रादिकारकरूपत्वम् इत्यर्थः। कारणेषु कुलालादिषु कर्त्रादिकारकभावदर्शनाद् इति भावः)। (ब्रह्म अचेतनं वस्तुत्वाद् मृदादिवद् इत्याह - वस्तुत्वाद् इति) वस्तुत्वात् मृद्वत् २) अचिद्रूपता च प्राप्ता। अत[5] इदमुच्यते - ज्ञानं ब्रह्मेति (सच्चिदानन्द - तच्च कारणम् यदि प्रकृतित्वाद् भिन्नम्, तर्हि तर्तृत्वादिकारकविशेषत्वं प्रसज्यते।, अथ प्रकृतित्वं, तर्हि सावयववस्तुत्वात् मृदादिवद् अचिद्रूपता बलाद् आपतति तदेतदुभयदोषनिवारणाय ज्ञानम् इति विशेषणम्)। (ननु ज्ञानविशेषणेन ब्रह्मणः कारकनिवृत्तिः न लभ्यते, कर्तृसाधनज्ञानपदेन तस्य ज्ञानक्रियां प्रतिकर्तृकारकत्व-अवगमाद् इति, न इत्याह - ज्ञानं ज्ञप्तिः इति) ज्ञानं ज्ञप्तिः। अवबोधः। भावसाधनो (भावव्युत्पत्तिकः क्रियासामान्यं यद्यपि अन्यत्र - गमनभोजनादौ - भावः उच्यते तथापि अत्र निर्विशेषं चिन्मात्रं भावव्युत्पत्त्या लक्ष्यते सत्यादिशब्दसंनिधानात् इति द्रष्टव्यम्। अत्र गोविन्दानन्द - न हि क्रियामात्रे सत्यत्वादिसंभवि इति भावः) ज्ञानशब्दः। (ज्ञानपदस्य ज्ञप्तिपरत्वे हेतुमाह - ब्रह्मेति) ब्रह्मविशेषणत्वात् सत्यानन्ताभ्यां सह (ननु ज्ञानस्य सत्यानन्ताभ्यां सह ब्रह्म प्रति विशेषणत्वेऽपि ब्रह्म ज्ञानकर्तृ किं न स्याद् इत्याशङ्क्याह - न हि इति)। न हि सत्यता अनन्तता च ज्ञानकर्तृत्वे {ज्ञानवद्वस्तु, ज्ञानकर्तृ इत्यस्मिन् एवार्थे ज्ञानम् इति अच्प्रत्ययान्तः} सति उपपद्यते। (ब्रह्मणो ज्ञानकर्तृत्वे सत्यत्वाद्यनुपपत्तिं प्रपञ्चयति - ज्ञानकर्तृत्वेन इति। ज्ञानकर्तृत्वं हि ज्ञानं तदनुकूलक्रिया च। न च ज्ञानादिरूपेण विक्रियमाणस्य ब्रह्मणः सत्यत्वं सम्भवति. विकारजातस्य इव विकारिणोऽपि जडत्वनियमाद् जडस्य च चिति अध्यस्तत्वनियमेन अनृतत्व-अवश्यंभावाद् इति युक्तिसूचनार्थो हि-शब्दः।) ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेत्। अनन्तं च {कथं भवेद् इत्यनुषङ्गः। कथमिति आक्षेपार्थत्वाद् न भवेदेव इत्यर्थः}। (तत्र हेतुः - यद्धि इति) यद्धि न कुतश्चित् प्रविभज्यते (भिद्यते), तदनन्तम्। (ननु ज्ञानकर्तृत्वेऽपि ब्रह्मणो नास्ति कुतश्चित् प्रविभागः, तत्राह - ज्ञानकर्तृत्वे च इति। च-शब्दः शङ्कानिरासार्थः। कर्तृत्वस्य कर्मक्रियानिरूपितत्वात् ताभ्यां कर्तुः भेदाभावे कर्त्रादिव्यवस्था-अयोगात्, तस्माद् ब्रह्मणोऽनन्तताये ज्ञात्रादिद्वैतराहित्यं वक्तव्यम् इत्यर्थः।) ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तम् इत्यनन्तता न स्यात्।) तस्य सर्वद्वैतराहित्ये श्रुत्यन्तरमाह - यत्रेति।) "यत्र नान्यद्विजानाति स भूमा {भूमा इति बहुत्ववाची शब्दः बृहत्तमवाचकब्रह्मशब्दपर्यायः}, अथ (ज्ञानक्रियाकर्तृभूतस्य वस्तुतोऽनन्तत्वाभावेऽपि श्रुतिमाह - यत्र अन्यदिति) यत्र (यत्रेत्यस्य यदित्यर्थः) अन्यद्विजानाति तदल्पम्" (छा.७.२४.१) इति श्रुत्यन्तरात् {इति च इति चकारोऽध्याहर्तव्यम्। उक्तश्रुत्यन्तर्गतसमुच्चयार्थम्।}।

The Meaning of Jnanam

---

[5] ननु च कारणत्वप्राप्तिः इष्टा एव। वक्ष्यति हि अनुपदमेव - तस्माद्वा आत्मनः इति। उत्तरत्र च सोऽकामयत इत प्रकृतित्वम्, इदं सर्वम् असृजत इति सृष्टिकर्तृत्व वक्ष्यते। तत्कथम् अयं दोषः स्याद् इति। न श्रुत्यभिमतकारणत्वस्य मायिकत्वेन उपपत्तेः। इन्द्रे मायाभिः पुरुरूप ईयते इति श्रुत्यन्तरात्। मा. का ३.२७ अपि द्रष्टव्यम्। (सच्चिदानन्द)

Satyam negates vikaritvam, effectness from Brahman. By parisesha-nyaya, so, Brahman has gained the status of being the cause. Because it is satya. Let it be cause. No then karakatvam will come. The first karaka is karta, nimitta-karana. Upadana is apadana (see notes on tasmat va etasmat + (page 57). Apadana is one cause. Nimitta is another cause. Karta. I want Brahman to be both. Let it be. No if it is apadana, it becomes inert. Doer also involves change. He has to desire to create. If undergoes change Brahman becomes vikaravan and anrtam. Let us take here only apadana cause. It becomes inert. Brahman acetanam, being an object vastutvat. Like even clay etc. which are causes. Vastutvam is karanatvam. Any *kārana* is vastu. Brahman also is vastu. Vastu is handled by whom? If you ask further questions, hundreds of problems will arise. Listen, therefore this is said - Jnanam iti. While satyam, at the same time it is jnanam Brahma. To eliminate inertness, jnanam is added.

Again, if jnanam means vritti, again it will undergo change. No because it is satyam also. So jnanam means pure knowledge. It is derived from the root jna to know. The affix is lyut. Bhave. lyut always neuter. Ghanj is always masculine. Bhavartha is always meaning of the root. yu remains. Yuvoranakau. So jna plus ana. Atom. Ami purvah. Jnanam. This is called bhavasadhana. Bhave sadhanah pratyayah. So knowledge is jnanam. It is not any other derivation, like karma, karana etc. Without undergoing any change it is knowledge. So we have to use the common word knowledge (uncommon word is not going to communicate like gagabhuga) At the same time, commonality is removed by words in apposition. The words are released form its limitations and vastu alone remains. Satyam is there. Anantam is there. That is how the words get released from their limitation. Then vastu alone is there. That is why lakshana.

Bhavasadhana. Purely dhatvartha. ज्ञा means to know. The root meaning is knowledge. In every form of knowledge what is satyam, that consciousness alone is the meaning. Being the adjective to Brahman, it is so.

Jnanam Cannot Mean Knower

Still why not we take Brahman as knower. No It is adjective along with satya and ananta. If it is knower or means of knowledge, it will be changing. If so, then it is not satyam. It should be changeless jnanam. To become karta involves some change. All changes are vikara and anrtam. Vastu is talked about here. If knowledge is taken as knower, or that by which known i.e., karanam, then they will be limited. If it is one, it will not be another. So ananta word will negate those meanings. In order to be limitless, it has to be not any one of them.

There are three types of limitations in knower etc.

By time. Knowledge takes place in time and knower therefore is limited in time.

By place. If knower is Brahman, Brahman is not there where the object of knowledge is there.

By objects. Brahman will not include objects that are yet to be known and different from knower.

Anantam satyam means changeless and anantam jnanam means not any one of the derivatives. Let it be all the three. That is what we say. But to be all the three, it should be free from all the three. So pure consciousness. That is svarupam. Satyam already has given the meaning - the cause. Then only equation with Isvara is possible. Sarvatma-bhava is possible. Jnanam is you. Not knower, but consciousness.

Bhashyakara here quotes the Bhumasruti because, if jnanam is knower, then it will contradict Bhumasruti. Yatra will create problem of 'in which samadhi state' etc. Now you are alpa because you see another thing. Narada is told by Sanatkumara here. anyat na vijanati means anyat iti na vijanati. That is bhuma. So where no difference of karta-karma is not there, that is bhuma. Then alone it will be limitless. If everything is not there, then alone it is bhuma, then when everything is there, it will not be bhuma and bhuma is limited. So jnanam here is pure knowledge. (Thus the word jnana and ananta eliminate jadatvam and karakatvam respectively)

आत्मनो ज्ञेयत्वमपि न ज्ञानशब्दार्थः

(आ.गिरि - विशेषनिषेधः शेषाभ्यमुज्ञाविषय इति न्यायेन प्रासङ्गिकं स्वज्ञातृत्वे तात्पर्यमाशङ्क्य निषेधति - नान्यदिति।) (सच्चिदानन्द - अथ ज्ञायते इति ज्ञानम् - इति कर्मसाधनत्वेनापि ज्ञानशब्दमुपपन्नं मन्वानस्य शङ्कामुत्थापयति।) "नान्यद्विजानाति (तत्रस्थभाष्यम् - यस्मिन् तत्वे न अन्यद् द्रष्टव्यम् अन्येन करणेन द्रष्टा अन्यः विभक्तः दृश्यात् पश्यति)" इति[6] (शङ्कते - विशेषप्रतिषेधादिति। न विजानाति इति ज्ञानकर्तृत्वसामान्यनिषेधम् अकृत्वा अन्यन्न विजानाति इति अन्यविज्ञातृत्वरूप-विशेषप्रतिषेधसामर्थ्यात् स्वकर्मक-ज्ञानकर्तृत्वं भूम्नः श्रुत्यनुमतमिति गम्यते। तथा च यः स्वात्मानं विजानाति स भूमा इति वाक्यार्थपर्यवसानाद् ब्रह्मणो द्वैतराहित्येन इयं श्रुतिः मानमित्यर्थः।) विशेषप्रतिषेधात् आत्मानं विजानाति इति चेत्। ("भूमानं भगवो विजिज्ञासे" इति भूमस्वरूपलक्षण-जिज्ञासायां सत्याम् इदं वाक्यं प्रवृत्तम्। अतो न स्वज्ञातृत्वपरमिदं वाक्यमिति दूषयति - न इति।) न। भूमलक्षण-विधिपरत्वाद् वाक्यस्य। (संग्रहवाक्यं विवृणोति - यत्र इत्यादिना। भूम्नः लक्षणविधिपरत्वमेव वाक्यं, न स्वात्मनि क्रियास्तित्वपरमिति संबन्धः। बुभुत्सितभूमस्वरूपज्ञापनपरमेव तत्, न स्वकर्मकज्ञानक्रियाकर्तृत्व-सद्भावपरम् {स्वः एव कर्म यस्य}, तस्य अबुभुत्सितत्वाद् इत्यर्थः।) यत्र नान्यत् पश्यति इत्यादि भूम्नो लक्षणविधिपरं वाक्यम्। (वाक्यस्य स्वज्ञातृत्वपरत्वाभावे फलितं वाक्यार्थमाह - यथाप्रसिद्धमेवेति। भ्रान्तिसिद्धमेव {अविचारसिद्धम्} ज्ञात्रादिद्वैतम् अनूद्य तद्यत्र वस्तुतो नास्ति स भूमा इति भूमस्वरूपं लक्षणवाक्येन बोध्यते एवम् अन्यग्रहणस्य प्रतिषेधशेषत्वाद् न स्वज्ञातृत्वे वाक्य-तात्पर्यग्राहकता इत्यर्थः।) यथा प्रसिद्धमेव अन्योऽन्यत् पश्यति इति एतद् (यथोक्तं द्वैतम्) उपादाय, यत्र तन्नास्ति स भूमा इति भूमस्वरूपं तत्र ज्ञाप्यते। अन्यग्रहणस्य

---

[6] अत्र अन्ययोगव्यवच्छेदः अभिप्रेतः. न तु विज्ञानयोगमात्रं निषिद्धमिति भावः। इति शङ्का। न। वाक्यभेदप्रसङ्गाद् इति समाधानम्। प्रसिद्ध-अन्यविज्ञान-निषेधपरमेकं वाक्यम्, आत्मानं विजानाति इति विज्ञानविधिपरमपरं वाक्यम्। तन्न युक्तम्। युक्त्यापि आत्मनि ज्ञेयत्वं न सिध्यति इति।

प्राप्तप्रतिषेधार्थत्वात् न स्वात्मनि क्रियास्तित्वपरं वाक्यम्। (विरोधादपि न स्वज्ञातृत्वे भूमलक्षणवाक्यतात्पर्यम् इत्याह - स्वात्मनि च इति। एकक्रियानिरूपितं कर्तृत्वं कर्मत्वं च एकदा एकत्र विरुद्धत्वेन प्रसिद्धम्। तथा च स्वात्मनि ब्रह्मणि भेदाभावात् स्वकर्मकज्ञानकर्तृत्व-अनुपपत्तिः इत्यर्थः) (आ.गिरि - कर्तृत्वं कर्मत्वं च एकक्रिया-अवच्छिन्नं {निरूपितम्} धर्मद्वयं भिन्नाधिकरणं प्रसिद्धम्। स्वात्मनि च भेदाभावाद् निरुपपत्तिके स्वज्ञातृत्वे तात्पर्यं कल्पयितुं न शक्यते इत्याह - स्वात्मनि च इति।) स्वात्मनि[७] च भेदाभावाद् विज्ञानानुपपत्तिः[८]। (ननु त्रहि प्रत्यगात्म-रूपस्य ब्रह्मणो ज्ञानकर्मत्वमेव अस्तु, तत्राह - आत्मनष्ठ इति। चशब्दः शङ्कानिरासार्थः।) आत्मनष्ठ विज्ञेयत्वे ज्ञात्रभावप्रसङ्गः। ज्ञेयत्वेनैव विनियुक्तत्वात्।।

When one does not see another - here something is negated. na is there. It negates knowledge of another thing. It has this implication that he knows atma. So where one knows atma means he becomes the object of knowledge. Visesha is another. It is not true. He is not talking about where and when etc. The question is lakshana of Bhuma. What is the connection between question and answer. The answer should be, this is bhuma. The answer will not be having tatparya in negating something. Vidhi means positively unfolding. paratvam is commitment. The answer is committed to positively revealing the definition of bhuma. Generally people take atma as knower only. The main karaka is negated thereby all other karakas also stand negated.

Bhuma does not come when something takes place. It is not submarine. Bhuma is appreciated in this way. Why there is mention of anyat? It is meant to negate what is prapta. Don't miss to wash your horns. I need not say. Prapta is possibility also. Like suram na pibet. Here dvaita is really prapta. It is taken to be real. So that is negated here. The sentence is not committed to reveal the operation of knowledge in oneself. Self-seeing is not the purpose here. Let us see if it is possible. Who sees? Self or not-self? If self is known, who is the knower? No knower because atma has become seen and everything else is inert. No seer left. I am the seer. Then you are the atma.

Thus Jnanam cannot mean knower etc but only root meaning because

the words satyam and anantam will not become tenable.

The sruti also shows jnanam is free from divisions in nanyat vijanati iti. On this sruti vakya a pruvapaksha is raised

There are two reasons for negating purvapakshi here.

Sruti's intent is to define Brahman and so negation does not imply jnanakriya in atma.

Logically also it is not tenable to posit jnanakriya in atma as there are no differences in atma.

The objection that atma can be both knower and known is negated for two reasons.

---

[7] युक्त्यापि आत्मनि ज्ञेयत्वं न सिध्यति इति एतत्प्रदर्शनार्थम् स्वात्मनि इति। निरंशत्वेन विभाग-अनुपपत्तेः।

[8] ब्रह्मैव ज्ञाता अतस्तेन ज्ञानानुपपत्तिः। स्वस्य स्वज्ञेयत्व-अयोगात्। (शास्त्रि)

Atma is free from parts

If atma can become object also, then there is no need for teaching as it can be known by other means of knowledge.(This is explained further below.)

(ननु आत्मनः चिज्जडरूप-अंशद्वय-उपेतत्वात् चिदंशेनज्ञाता जडांशेन ज्ञेयष्ट भविष्यति, अतो न ज्ञात्रभावप्रसङ्गः इति भाट्टमतम् आशङ्क्य निषेधति - एक एव इति। In sleep both experiences are there. I did not know anything is jadamsa. I slept happily is jnanam.) एक एव आत्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवति इति चेत्। न (निष्कलश्रुत्या - श्वे.उप ६.१९ - आत्मनो निरवयवत्व-अवगमात् सावयवस्य अनित्यत्वनियमाच्च तन्मतं न युक्तमित्यर्थः) युगपद्, अनंशत्वात्। (ननु निरवयवस्यापि युगपद् एकज्ञानक्रियानिरूपितं कर्तृत्वं कर्मत्वं च किं न स्याद् इत्याशङ्क्य "स्वात्मनि च" इत्यत्र उक्तमेव अनुपपत्तिं स्मारयति - न हि इति।) न हि निरवयवस्य युगपज्ज्ञेयज्ञातृत्व-उपपत्तिः। (स्वात्मनो लौकिकज्ञानकर्मत्व-उपगमे तदुपदेश-आनर्थक्य-प्रसङ्गाच्च, न स्वज्ञातृत्वे भूमवाक्यस्य, सत्यं ज्ञानम् इत्यत्र ज्ञानपदस्य च तात्पर्यम् इत्याह - आत्मनष्ट इति।) आत्मनष्ट घटादिवद् विज्ञेयत्वे {प्रमाणान्तर-प्रसिद्धत्व-उपपत्तेः, स्फीतालोकमध्यवर्ति-घटस्य ज्ञातव्यत्व-उपदेश इव} ज्ञानोपदेश-आनर्थक्यम्। न हि घटादिवत् प्रसिद्धस्य ज्ञानोपदेशः अर्थवान्। (ज्ञातुः ज्ञेयज्ञानाभ्यां प्रविभक्तत्वाद् इत्यर्थः)

ज्ञानशब्दस्य भावसाधनत्वेन उपसंहारः, तत्फलकथनं च

तस्मात् ज्ञातृत्वे सति {ज्ञातृत्वे इति उपलक्षणार्थं, ज्ञेयत्वस्यापि निरस्तत्वात्} आनन्त्यानुपपत्तिः। (ब्रह्मणो ज्ञातृत्वे सत्यत्व-अनुपपत्तिमपि उक्तां स्मारयति - सन्मात्रत्वं चेति। ज्ञानकर्तृत्वादिविशेषवत्वं ज्ञानतदनुकूल-क्रियादिरूपपरिणामवत्वं परणामिनष्ट मिथ्यात्व-अवश्यंभावाद् बाध-अयोग्यत्वरूपं सन्मात्रत्वम् अनुपपन्नम् इत्यर्थः) (सच्चिदानन्द - तदेवं आनन्त्यानुपपत्तिम् उपसंहृत्य सत्यत्वानुपपत्तेः प्रदर्शितायाः अपि प्रकारान्तरेण प्रदर्शनार्थम् अन्वारम्भेण आह - सन्मात्रमिति) सन्मात्रत्वं च अनुपपन्नम्, ज्ञानकर्तृत्वादिविशेषवत्वे सति। (ननु सन्मात्रत्व-अनुपपत्तौ अपि मन्त्रोक्तस्य सत्यत्व-अनुपपत्तौ किमागतमित्यत आह - सन्मात्रं च सत्यमिति। सद्वस्तु प्रकृत्य तत्सत्यं इति वदता श्रुत्यन्तरेण सन्मात्रसत्ययोरभेदप्रतिपादनात् सन्मात्रत्वानुपपत्तिः सत्यत्वानुपपत्तिरेव इत्यर्थः।) सन्मात्रं च सत्यम्, "तत्सत्यम्" (छा. ६.८.७ - ६.१६.३) इति श्रुत्यन्तरात् (सच्चिदानन्द - पुनः पुनः सन्मात्रस्यैव सत्यत्व-अवधारणात्। अत्र भावसाधनत्वे यदधिकं वक्तव्यम्, तदुपरिष्टात् शून्यवादप्रसङ्गभाष्यविमर्शानन्तरं वक्ष्यते) । (ब्रह्मणो ज्ञानकर्तृत्वे सत्यत्व-अनन्तत्वयोः अयोगाद् ज्ञानशब्दस्य भावसाधनत्वमेव इति उपसंहरति - तस्मादिति) तस्मात् सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद् भावसाधनो ज्ञानशब्दः। (ज्ञानपदस्य ज्ञप्तिपरत्वे सिद्धे फलितमाह - ज्ञानमिति। यदुक्तं सत्यविशेषणेन ब्रह्मणो विकाराद् व्यावृत्तिसिद्धौ विकारभिन्नत्वात् कारणत्वं प्राप्तम्, कारणस्य च कारकत्वम् मृदादिवत् अचिद्रूपता च प्राप्ता। अत इदमुच्यते ज्ञानं ब्रह्मेति, ज्ञानविशेषणफलं तदत्र सिद्धम् इति बोध्यम्। ज्ञानशब्दस्य ज्ञानकर्तृपरत्वनिराकरणपरेण ग्रन्थेन अर्थाद् ज्ञायते यत्तद् ज्ञानमिति कर्मव्युत्पत्तिप्राप्तं कर्मकारकत्वमपि "स्वात्मनि च भेदाभावाद्" इत्यादिना निरस्तम्, एवं ज्ञायते अनेन इति व्युत्पत्तिप्राप्तं करणकारकत्वमपि ब्रह्मरूपस्य आत्मनो न संभवति, तस्य करणत्वे ज्ञात्रभावप्रसङ्गात्,

इदमपि प्राक् "आत्मनष्ठा विज्ञेयत्वे ज्ञात्रभावप्रसङ्गः" इत्यत्र उक्तप्रायमेव, तथा ज्ञावकर्तृत्वनिराकरणेन अधिकरणकारकत्वमपि निरस्तम्, एवं ज्ञानपदस्य कारकान्तरपरत्वनिराकरणमपि सिद्धवत्कृत्य "कर्त्रादि" इत्यादिग्रहणमिति मन्तव्यम्।) "ज्ञानं ब्रह्म" इति कर्त्रादिकारकनिवृत्यर्थं मृदादिवत् अचिद्रूपता-निवृत्यर्थं च (यद्यपि भावसाधनो ज्ञानशब्दः ज्ञप्तिक्रियावाची, सा च पिया जडरूपा वृत्तिरिति वक्ष्यते, तथापि ज्ञानपदस्य चैतन्यलक्षकत्वं वक्ष्यमाणम् अभिप्रेत्य अचिद्रूपतानिवृत्यर्थं च इत्युक्तमिति मन्तव्यम्।) प्रयुज्यते।

Bhattas' Objection and Answer

Why not we take this way? Atma is cit and jada. They are some opinions. Part of atma is cit and part is jada. Like hair is inert. Jata is jada. Body is cetana. So cetana part is knower and jada part is known. What do you get out of knowing the jada part. I am half inert will be knowledge! Bhattas also say like that. Atma thus is twofold. Then atma can see atma. Like even in sleep where cit and jada aspect of atma is seen to be present very clearly and that is why I say, I did not know anything, in which cit aspect of atma knows the jada aspect of atma and thus self can exist as knower and known simultaneously.

No, atma is free from parts. na yugapt. Simultaneously it is not possible. niramsatvat, Because of absence of parts in atma. Does caitanya has parts. If inertness is part of caitanyam, how do you know. I see. Then how can it be atma who knows. You cannot see atma to say it has parts. If you see, it is not caitanyam. Sruti also does not help. It says nishkalam etc. So something which has no parts cannot be knower as well as known.

Another thing is said. If atma is an object of knowledge, like pot, then sruti need not talk about it at all. You can see. It is within your pramana. It is not anadhigata. It becomes sakshipratyaksha or indriyapratyaksha. Srutipramanyam is not there. So the teaching is useless - teaching that "you are that". Neither Narada has to ask nor Sruti has to respond. He explains. Teaching by the scriptures here. Because teaching by other disciplines like physics etc. are meaningful. If sruti talks of something, then that is useless. It won't be the topic of sruti. So by prasanga, he quoted a sruti in which an objection was pointed out which was answered. Another argument which he passingly mentioned that if Sruti presents atma as an object it will lose apurvata and so pramanya goes away iti. So the arguement is concluded here. The meaning of jnana can be only root meaning only.

What remains of the word satyam now is sat only. All differences are negated. In our concept, any thing that is, is in time only. Existence is in terms of time, before it was not, later it will not be, now it is. Swamiji is here or not if you ask, he is not means, now he is not. Existence and time goes together. Here we have to negate the time element because time also is a variable and that because of which time is, is invariable. All names and forms and effects are negated. Jnanakriya, if it is there, then also it won't be sat matram. But who told sat is satyam? Elsewhere sruti says sat and satyam are same. Without vikara what was there is sat

and it continues to be there. That alone is satyam and every other vikara is word only and mithya. Thus the meaning of the word jnanam thus bhavasadhana in association with other two words. It is sandwiched by the other two words. It is squeezed into awareness. And it serves the purpose of negating differences of karakas as cause and inertness

अनन्तम् इति विशेषणस्य कृत्यम्

(ज्ञानपदस्य वाच्यार्थमादाय शङ्कते - ज्ञानं ब्रह्मेति) ज्ञानं ब्रह्म इति वचनात् प्राप्तम् अन्तवत्वम्, लौकिकस्य ज्ञानस्य (लोके भवति इति लौकिकं ज्ञानम्, तच्च तत्तद्-विषयपरिच्छिन्नं, कालपरिच्छिन्नं, स्वनिष्पादकसाधनपरिच्छिन्नं चेति तस्य अन्तवत्व-दर्शनात्, ज्ञानरूपस्य ब्रह्मणोऽपि अन्तवत्वं स्यादिति प्राप्तम्)) अन्तवत्वदर्शनात् । अतः तन्निवृत्यर्थम् आह - अनन्तमिति (ब्रह्मणो ज्ञप्तिक्रियारूपत्वे सति आनन्त्य-अयोगाद् आनन्त्यसिद्धये ज्ञानपदेन चैतन्यमात्रं लक्षणीयमिति भावः।)।

A given piece of knowledge is limited. We are using laukika word only. We use Sanskrit word to convey. Sanskrit is not alaukika. It is not understood and therefore seen as alaukika. It has got a word ghata, pata etc. like any other language. It is a language. That is not alaukika. Jnanam you understand a piece of knowledge which is limited by object, time etc. That limitation is negated by the word ananta.

लक्षणवाक्यस्य अबोधकत्वशङ्का तत्परिहृतिश्च

लक्षणवाक्यस्य आनर्थकता शङ्का

(सत्यादिविशेषणैः अनृतादिव्यावृत्तेः उक्तत्वात् अनृतादिव्यावृत्तिरेव सत्यादिपदवाच्यत्वेन उक्ता इत मत्वा शङ्कते - सत्यादीनामिति) सत्यादीनाम् अनृतादिधर्मनिवृत्तिपरत्वाद् (ब्रह्मपदमपि असदर्थकमेव ब्रह्मणो मानान्तर-असिद्धत्वेन तत्सत्वे मानाभावात् इत्याह - विशेष्यस्य च इति) विशेष्यस्य च ब्रह्मणः उत्पलादिवत् (उत्पलादिवत् प्रत्यक्षादि-वेद्यं ब्रह्म येन सत्यादीनि केवलव्यावृत्त्यापि तत्स्वरूपं समर्पयेयुः) अप्रसिद्धत्वात् (पदचतुष्टयस्यापि असदर्थकत्वे फलितं सदृष्टान्तमाह - मृगेति। न च अनृतादिव्यावृत्तेः अन्योन्य-अभावरूपत्वेन शशशृङ्गादिवत् असत्वाभावात् कथं शून्यार्थकता इति वाच्यम्। सिद्धान्त्यभिमतवाक्यार्थ-निषेधमात्रस्य अत्र विवक्षितत्वात्।) "मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः। एष वन्ध्यासुतो याति शशशृङ्ग-धनुर्धरः" इतिवत् शून्यार्थता एव प्राप्ता सत्यादिवाक्यस्य इति चेत्।

An adjective is used to negate something else. Now understand that satyam negates false. Jnanam negates inertness. Anantam negates limitations. All the three adjectives when negate the opposite, they don't reveal anything because such a vastu is not there. Bauddha jumps from the raft and sits in front of you. The fellow says Brahman is asat, sunyam. Why so many words? You can use them. In the case of lily, you can see the vastu by negation. I don't see anything other than jadam or anrtam or limited. Pramanatara-avedyam is aprasiddham. Why so many words to point out sunyam? It is necessary because you take vastu to be satyam, it is

negated. And so on. Sunyam - four types of abhava are talked of. So four things are given in the verse. This fellow having taken his bath in the mirage water and krtam alankrtam. Whose hair decked or decorated with a lot of flowers that are plucked form the sky. He has a bow in his hand made out of specially selected rabbit's horns (because it has to be long for making a bow). Who is this fellow? This person is son of woman who never gave birth to a child in her life. That fellow goes. We can add a few more. Who says this verse. A dumb mukah. Who heard this? deaf. badhirah. Who believes this? vayam, we. All the eight are sunyam. The adjectives have done only the job of negation and negated the whole world and nothing is left.

शून्यार्थताशङ्कापरिहारः

(परिहरति - न इति) न। (आ.गिरि - सिद्धत्वमात्रेण विशेष्यत्वे सम्भवति प्रमाणान्तरविशेषणम् अनर्थकम् केवलव्यतिरेकाभावात्[9], मिथ्यार्थस्य रज्जुसर्पादेः सदधिष्ठानत्वदर्शनात् प्रपञ्चस्यापि दृश्यत्वादिहेतुभिः मिथ्यात्वेन अवगतस्य सदधिष्ठानत्वम् संभाव्यते, तस्य प्रपञ्च-अधिष्ठानतया संभावितस्य स्वरूपविशेषलक्षणार्थम् इदं वाक्यं ततो न असदर्थत्वम् इत्याह - न लक्षणार्थत्वात् इति।) लक्षणार्थत्वात्। (ननु व्यावृत्यर्थत्वस्य उक्तत्वात् कथं लक्षणार्थत्वम् इत्याशङ्क्य संग्रहवाक्यं विवृणोति - विशेषणत्वेऽपि इति। च-शब्दः शङ्कानिरासार्थः। सत्यादिपदत्रयस्य विशेषणत्वेऽपि व्यावृत्यर्थत्वेऽपि न व्यावृत्तेः शाब्दत्वम् उपेयते, व्यावृत्तेः आर्थिकत्व-उपपत्तेः, अतो लक्षणरूपार्थपरत्वमेव युक्तमित्यर्थः।) विशेषणत्वेऽपि च[10] सत्यादीनां लक्षणार्थप्राधान्यम् इत्यवोचाम। (अत एव ब्रह्मपदमपि नासदर्थकम् इत्याह - शून्ये हि इति)। शून्ये हि लक्ष्ये (असति लक्ष्ये) अनर्थकं लक्षणवचनम्। अतः लक्षणार्थत्वाद् मन्यामहे न शून्यार्थता इति।

No. The adjectives are meant to reveal a vastu also. There is a lakshya to point out positively. If it is sunya, you don't require a special word. Sunyam is not satyam, you have to say unlike anything else. Why satyma etc.? By the word, it can not be indicated. All positive words are used here. A lakshana has to negate to distinguish the object.

(विशेषणत्वेऽपि च सत्यादीनां न असदर्थता इत्युक्तमेव प्रपञ्चयति विशेषणार्थत्वेऽपि इत्यादिना। सत्यादिपदानां व्यावृत्तिप्रयोजनकत्वेऽपि स्वार्थस्य सन्मात्रादेः परित्यागो नास्त्येव।)। (आ.गिरि - विशेषणार्थत्वम् अभ्युपगम्य आह - विशेषणार्थत्वेऽपि इति। नीलं-महत्-इत्यादिविशेषणपदानि स्वार्थसमर्पणेन तद्विरुद्धव्यावर्तकानि प्रसिद्धानि, तथा सत्यशब्दोऽपि अबाधितसत्वे व्युत्पन्नः, ज्ञानशब्दः स्वप्रकाशे विषयसंवेदने, अनन्तऽयमाकाशः इत्यादौ अनन्तशब्दः व्यापके। ततः स्वार्थसमर्पणेन-विरोधिव्यावर्तकत्वाद् न व्यावृत्तिमात्रपर्यवसानम् इत्यर्थः। {गोविन्दानन्द - न व्यावृत्तिमात्रपर्यवसानम् इति। व्यावृत्तेः आर्थिकत्वादेव इति भावः। शास्त्रि - स्वरूपे तात्पर्यम्। व्यावृत्तिः आर्थिकी})

---

[9] ब्रह्म न विशेष्यम् असिद्धत्वात् उत्पलादिवत् इत्यस्य स्वरूपासिद्धत्वे न असंभवाद् इत्यर्थः। ब्रह्मणः सिद्धत्वसाधनेन स्वरूपासिद्धिं साधयति - मिथ्यार्थस्य इत्यादिना । अनुमानस्य प्रमाणानुग्राहकत्वमात्रम् अभिप्रेत्य आह - संभावितस्य इति।अन्यथा प्रमितस्य इत्येव ब्रूयात्। (गोविन्दानन्द)

[10] सामानाधिकरण्य-प्रतीतेः यो विशेषणविशेष्यभावः निर्धारितः तेन सत्यादीनि पदानि स्वविरोध्यर्थव्यावर्तकानि इति अवगम्यते। तदनु लक्षण-लक्ष्यभावेऽवगते ब्रह्मणः सर्वतो व्यावृतं स्वरूपं समर्पितं भवति इत्येषः ब्रह्मप्रतिपत्तिक्रमः।

विशेषणार्थत्वेऽपि[११] च सत्यादीनां स्वार्थ-अपरित्याग एव। (कुतः इत्यत आह - शून्यार्थत्वे हि इति। सत्यादिपदानां शून्यार्थत्वे स्वार्थपरित्यागे सति विशेष्यं प्रति नियन्तृत्वानुपपत्तिः, इतरव्यावृत्तिप्रयोजनकत्वस्य पूर्ववाद्यभिमतस्य अनुपपत्तिः सत्यादिपदैः ब्रह्मणि व्यावर्त्तकस्वरूपविशेष-असमर्पणात् लोके नीलादिपदैः उत्पले नैल्यादिरूपविशेषे समर्पिते सत्येव रक्तादिव्यावृत्ति-बोधदर्शनात् इति हि-शब्दार्थः।) (आ.गिरि - किं च विशेषणस्य व्यावर्तकत्वं सति व्यावर्त्ये घटते, अतो विशेषणत्व-अनुपपत्या एव सदर्थत्वं वाच्यम् इत्याह - शून्यार्थत्वे हि इति) शून्यार्थत्वे (असदर्थत्वे) हि सत्यादिशब्दानां विशेष्यनियन्तृत्वानुपपत्तिः (नियन्तृत्वं व्यावर्तकत्वम्)। (एवं व्यतिरेकमुक्त्वा अन्वयमाह - सत्याद्यर्थैः इतिः) सत्यादि-अर्थैः अर्थवत्वे तु तद्विपरीतधर्मवद्भिः (सत्यत्वादिधर्मविपरीताः अनुतत्वादिधर्माः तद्वन्तः अनृतजडपरिच्छिन्नाः पदार्थाः तेभ्यः इत्यर्थः) विशेष्येभ्यः ब्रह्मणः विशेष्यस्य (ब्रह्मणः विशेष्यस्य इति षष्ठ्यौ द्वितीयार्थे) नियन्तृत्वम् उपपद्यते (सत्यादिपदानामिति शेषः)। (यदुक्तं विशेष्यस्य ब्रह्मणः उत्पलादिवत् अप्रसिद्धत्वात् असत्वमिति, तत्राह - ब्रह्मशब्दोऽपि इति) ब्रह्मशब्दोऽपि स्वार्थेन (आ.गिरि - बृह बृहि वृद्धौ इति धातोः ब्रह्मेति शब्दः निष्पन्नः वृद्धौ महत्वे वर्त्तते। तच्च महत्वं देशतः कालतः वस्तुतश्च अनवच्छिन्नत्वं संकाचकमानान्तर-अभावाद् निरतिशयमहत्वसंपन्ने धर्मिणि पर्यवस्यति {ब्रह्म-शब्दः इति शेषः} । ततो वन्ध्यासुतादिशब्दविलक्षणः ब्रह्मशब्दः इत्यर्थः।) (वृद्धिमत्वेन इत्यर्थः। न च पदमात्रस्य {गोविन्दानन्द - ब्रह्मपदादेव सिद्धत्वम् आशङ्क्य आह - पदमात्रस्य इति} अप्रमाणत्वात् उत्पलादिवन्मानान्तर-अप्रसिद्धत्वाच्च न तस्य सत्वसिद्धिः इति वाच्यम्, मिथ्यार्थस्य रज्जुसर्पादेः सदधिष्ठानत्वदर्शनात् प्रपञ्चस्यापि दृश्यत्वादिहेतुभिः मिथ्यात्वेन अवगतस्य सदधिष्ठानत्वम् अनुमीयते, एवं सर्वाधिष्ठानतया अनुमानोपस्थिते वृद्धिमति ब्रह्मशब्दस्य शक्तिग्रह-अभ्युपगमाद् न तस्य असत्वाशङ्का, न च एवम् अनुमानादेव ब्रह्मसिद्धेः श्रुत्यादिवैयर्थ्यमिति वाच्यम्, तस्य स्वरूपविशेष-अवगतेः श्रुत्यधीनत्व-अभ्युपगमादिति भावः।) अर्थवानेव। (ब्रह्मस्वरूपरलक्षणसमर्पकेषु सत्यादिपदेषु त्रिषु अवान्तरभेदमाह - तत्रेति) (आ.गिरि - सत्यादिषु त्रिषु विशेषणेषु अवान्तर[१२]भेदमाह - तत्रेति) तत्र अनन्तशब्दः अन्तवत्व-प्रतिषेधद्वारेण[१३] विशेषणम् (अनन्तशब्दः परिच्छेद-अभावबोधनद्वारा ब्रह्मणो विशेषणं परिच्छिन्नाद् व्यावर्तकम् इत्यर्थः।)। सत्यज्ञानशब्दौ तु (अनन्तशब्दस्य इव सत्यज्ञानशब्दयोः अभावबोधद्वारकत्वं नास्ति इति विशेषार्थकः तु-शब्दः)

---

[11] विशेषणानि हि विशेष्यान्तरेभ्यः स्वविशेष्यं व्यावर्त्य तन्नियमनाय प्रयुज्यन्ते। तत्र असति स्व-अभिधेयेऽर्थे कथं स्वविशेष्यं नियच्छेयुः। असति च विशेष्ये किं नियच्छेयुः। न च लोके किञ्चिदपि पदं स्वार्थम् अनभिधाय केवलव्यावृत्यवबोधकं दृष्टचरम्। इहापि सत्यादीनि पदान्यपि कूटस्थनित्यादिवस्तु प्रथमं प्रतिपाद्य एव अनन्तरम् अनृतत्वादि-अभावम् अर्थात् गमयन्ति इति युक्तम्।

[12] व्यावृत्तेः आर्थिकत्वस्य त्रिषु अपि समानत्वेऽपि अनन्तशब्दे तु पुरस्तात् तट्टोधः परस्ताच्च स्वार्थबोधः, द्वयोस्तु तद्वैपरीत्यम् इति अवान्तरभेदः। शब्दानां नञ्घटिताघटितत्वमेव चात्र हेतुः इत्यवधेयम्। (गोविन्दानन्द)

[13] अनन्तशब्दः प्रतिषेधपरत्वोऽपि सत्यज्ञानशब्दसाहचर्यादेव स्वान्तर्भावित-अनन्तपदार्थं वक्तुं शक्यते (सच्चिदानन्द) । सत्यादिवदद् न स्वार्थसमर्पणेन इति भावः। तदर्थस्य आभावरूपता भावरूपे ब्रह्मणि अभेदेन तत्समर्पण-अयोगात्।यद्यपि अभावोऽप्ययं न ब्रह्मणोऽतिरिच्यते, तथापि ब्रह्मणोऽभावरूपत्व-अभावात् एव तथोक्तिः इत्यवधेयम्। वस्तुतस्तु पूर्णत्वमेव अनन्तशब्दार्थः, तस्य च अनन्तशब्देन अन्तवत्वप्रतिषेधद्वारा एव समर्पणं न्याय्यं नञ्घटितशब्दैः तथैव स्वार्थसमर्पणदर्शनात्।अभाव इत्युक्ते भावभिन्नः पदार्थविशेषः इति प्रतीतेः सर्वसम्मतत्वात् इत्यवधेयम्। (गोविन्दानन्द)

(तमेव विशेषं विवृणोति - स्वार्थेति। सच्चिद्रूपत्वलक्षणस्वार्थबोधनद्वारेणैव विशेषणे भवतः, अनृतादिव्यावर्तकौ भवतः, न अभावसमर्पणद्वारेण इत्यर्थः।अत्र ब्रह्मणि अनन्तपदसमर्पितः परिच्छेदाभावः ब्रह्मस्वरूपमेव, परिच्छेदस्य कल्पितत्वेन कल्पितप्रतियोगिक-अभावस्य अधिष्ठान-अनतिरेकात् इति मन्तव्यम्।) स्वार्थसमर्पणेनैव विशेषणे (व्यावर्तके) भवतः।

Though these words do the job of negation, still they are mainly for the purpose of serving the role of a lakshana for a lakshya which is not sunya and it is a vastu. Vandhyaputra need not be defined as one who is fat etc. He himself does not exist. So too here these words are defining words and a definition is for an existing object and not for non-existence thing. You have to say it is not. You don't even use the word Brahman, a special word and then say it is not there. Sastra need not bring in an unknown word and then say it is not. There is a systematic teaching for it. So the vakya is useless. So we consider here means it is not our opinion. It is satirical. There is no sunyartha because it is a lakshana vakya, It is obvious.

Then why did you use them as adjectives? They do have their own meaning by which it negates the opposite and their meaning is retained while negating the opposite and so also it is not sunya. Asti from the word satyam is formed. As is retained and the time limitation connoted by "is" is negated. In the negation of three things, all the I know is negated. I am always. (satyam says) I am always limited. No limitation is negated. Then I am limitless always am. May be inert. I am Jnanam. Each word retains its meaning.

Suppose satyam etc. are sunya, after negating anrtam etc, nothing is there, then how are they going to do the job of ascertaining the viseshya? So only if they retain their meaning, they can do the job of negating. It is bhagatyaga lakshana. Viseshya also is something having a meaning. So it cannot be sunya. It also retains its meaning. So no sunyata here. If sunya, then why big? Is it big sunya? Of the three words, the first two retain their meaning and become adjectives while the third word simply negates the limitation and becomes adjective. Anantam is anandam. Fullness. It is mahavakya complete when analysed.

(सच्चिदानन्द - शून्यवादः अत्र निरस्तं भवति। सर्वविकल्पप्रतिषेधमात्रेण परितुष्टाः शून्यवादिनः। वेदान्तिनस्तु सर्वविकल्पास्पदीभूत-स्वरूपव्यवस्थापने व्यग्रा इति। न हि निरास्पदः क्वचन विकल्पोऽस्ति। यथाहुर्वार्तिककाराः परमार्थमनालिङ्ग्य न दृष्टं वितथं क्वचित्। तस्माद्वा वितथं सर्वं परमार्थैकनिषिठितम्। (तै.वा २.६४) इति तस्माद्वा इति तस्मादेव इत्यर्थः। एवं च स्तयादिशब्दाः स्वार्थ-अभिधानमपरित्यज्य अनृतादिविकल्पव्यावर्तनपूर्वकं सर्वविकल्पास्पदीभूतं ब्रह्म समर्पयन्ति इति न लक्षणवाक्यस्य अबोधकत्वचोद्यम् अत्र अवतरति इति ध्येयम्। ननु एवं शब्दसमर्पितार्थत्वे ब्रह्मणः पदार्थत्वं च आपतति। तत्र कथं ब्रह्मणो निर्विशेषत्वसिद्धिः**?** कथं वा **"**यतो वाचो निवर्तन्ते**"** इति श्रुत्यनुरोध इति? नैष दोषः। अध्यारोपितनामरूपकर्मापेक्षया एव हि ब्रह्म लक्षणया निर्दिश्यते, 'ब्रह्म', 'आत्मा' इत्यादिशब्दैः। यदा तु स्वरूपमेव निर्दिदिक्षितं विधूतसर्वविशेषम्, तदा **"**अदृश्ये अनात्म्ये अनिरुक्ते अनिलयने अभयं प्रतिष्ठां विन्दते**"** इति सर्वविकल्पप्रतिषेधद्वारेणैव तत्तत्वसमर्पणम् इति अनवद्यम्।

वेदितुः आत्मत्वात् च ब्रह्म न असत्

(सच्चिदानन्द - यद्यपि निर्दोषेण वेदेन प्रणीतत्वाद् लक्षणवाक्यस्य न तच्छब्दप्रमाणकैः अतिशङ्कनीयं भवति, तथापि ब्ह्मवेदनस्य अनुभव-अवसानत्व-अभ्युपगमात्, न शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य सिद्धिः इति न्यायमनुसृत्य लक्षणवाक्यस्थशब्दव्यापार-निर्णयमात्रेण न ब्रह्म सिध्यति इति कैष्टिद् आशङ्क्येत. तन्निवारणार्थं वेदितुः आत्मैव ब्रह्म इति न ब्रह्म-असत्वआशङ्का कार्या इति बोधयन्, तत्र श्रुतिमुदाहरति - तस्माद्वा इति) (ननु जीवस्य अकल्पिततया तत्प्रतियोगिकभेदरूपस्य परिच्छेदस्य अकल्पितत्वाद् अनन्तपदेन कथं तन्निषेध इति चेक्, न। झीवब्रह्मणोः भेदस्य एव असिद्धेः इत्याशयेन आह - तस्माद् वा इति।) "तस्माद्वा एतस्मादात्मनः" **(2.1)** इति ब्रह्मण्येव आत्मशब्दप्रयोगात् वेदितुः आत्मा (एव) ब्रह्म। (आत्मशब्दस्य जीववाचित्वादिति भावः। आनन्दमयपदलक्षिते ब्रह्मणि आत्मशब्दप्रयोगाच्च एवम् इत्याह - एतमिति) "एतमानन्दमयमात्मानम्-उपसंक्रामति"[14] **(2.8)** इति च आत्मतां (ब्रह्मणः इति शेषः) दर्शयति। (ब्रह्मणः एव जीवभावे हेत्वन्तरमाह - तत्प्रवेशाच्च इति) तत्प्रवेशाच्च (ननु प्रवेशश्रवणं जीवभावेन इत्यत्र किं विनिगमकम् इत्याशङ्क्य श्रुत्यन्तरानुसाराद् इत्याशयेन विवृणोति - तत्सृष्ट्वा इति। श्रुतौ तच्छब्दौ ब्रह्मपरौ।) "तत्सृष्ट्वा तदेवानुप्राविशत्" **(2.6)** इति च तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति। अतो (ब्रह्मणो जीवभावेन प्रवेशश्रवणाद् इत्यर्थः) वेदितुः स्वरूपं ब्रह्म (अत्र शून्यवादप्रसङ्गपरिहारभाष्यस्य परिसमाप्तिः)।

Brahman is sunyam because it is not known at all. No. It is not totally aprasiddha because it is atma. Prasiddha alone becomes an object for committing error. What is seen by you in front alone is locus for mistake like a rope seen by eyes iti na. It should be prasiddha or evident. it should be known to you. Since Brahman is atma, it is always Brahman whether you know it or not. So it is a sitting duck for any kind of mistake. So no sunyartha. He also accept that he is there. Sunyoham I am. What is in your head is zero. But what is adhishthana for your conclusion is not zero. Tikakara gives funny connection. Or this can be the connection. Jnanam Brahma cet everything else is inert. Then what about me? Both are answered.

This problem is not there. Because me is indeed Brahman. That is the very commitment of the Sruti. The next mantra shows that. And Brahman is atma. So not aprasiddha. The anandamaya sruti also equates atma with anandamaya meaning atma pervades all the levels of annamaya etc. So it has to be Brahman in order to pervade all of them. The entry sruti also points out that what is obtaining in the body, mind etc is that Brahman alone who entered. So it is atma. Anena jivena atmana. Brahman did grhapravesam. So after building the house, you place bhagavan first. Svarupam means consciousness.

Thus there are four reasons for negating sunyavada

Satyam etc being defining words, the defined must be an existent thing.

---

[14] यद्यपि अत्र श्रुतौ आनन्दमये एव आत्मशब्दः प्रयुक्तःन उपसंक्रमणकर्तरि, तथापि अन्नमयाद्यानन्दमयान्तेषु प्रयुक्तस्य आत्मशब्दस्य तत्तदरिक्त-आत्मोपदेशेन संक्रमण-उपदेशात्, संक्रमणकर्ता एव ब्रह्म इति निर्दिष्टं भवति इति अदोषः।

The adjectives satyam and jnanam also have a positive meaning to contribute. So Substantive cannot be sunya

Brahman word also has positive meaning

Brahman and atma are equated as one and so atma being existent vastu, I, it cannot be sunya. Three srutis are quoted for showing the use of word atma in Brahman.

ब्रह्मणो ज्ञप्तिः कीदृशी

ज्ञानत्वं ज्ञानकर्तृत्वमेव स्याद् इत्याशङ्का

(सच्चिदानन्द - ब्रह्मणः आत्मत्व-अङ्गीकारे ज्ञानकर्तृत्वं पुनः प्राप्नोति इति शङ्कते - एवं तर्हि इति) (शङ्कते - एवं तर्हि इति। यदि उक्तरीत्या जीवात्मा एव ब्रह्म तर्हि ब्रह्मणः आत्म-अभिन्नत्वात् ज्ञानकर्तृत्वं प्राप्तम् इत्यर्थः।) एवं तर्हि (ब्रह्मणः) आत्मत्वाद् ज्ञानकर्तृत्वम्, (ननु असङ्गत्वाद् आत्मनः एव ज्ञानकर्तृत्वं नास्ति, कुतः तदभेदात् ब्रह्मणः तत्प्रसक्तिः इत्याशङ्क्य आह - आत्मा इति। जानामि इति ज्ञानकर्तृत्वस्य आत्मनि अनुभवसिद्धत्वाद् असङ्गत्वश्रुतिः अन्यपरा इति भावः।) (सच्चिदानन्द - आत्मत्वेऽपि कथं ज्ञातृत्वम् इत्यत आह - आत्मेति) आत्मा ज्ञाता इति हि प्रसिद्धम् (सच्चिदानन्द - आत्मा हि नाम स्वरूपं सर्वस्य सर्वोऽपि च - अहं पश्यामि, अहं श्रृणोमि, अहं मन्ये, अहं विजानामि - इति च ज्ञानकर्तृत्वमेव आत्मनि प्रत्येति, न तु ज्ञानत्वम्। अधिकृतश्च शास्त्रार्थं ज्ञात्वा तत्तत्कर्मानुष्ठाय फलं भोक्ष्ये - इत्येव् अभिसन्धत्ते इति प्रसिद्धमेतत्। अतोऽपि ज्ञानकर्तृत्वम् आत्मनः।) । (श्रुतिप्रामाण्याच्च) (गोविन्दानन्द - लोकप्रसिद्धिम् उक्त्वा शास्त्रप्रसिद्धिवक्तुम् आह - सोऽकामयत इति) "सोऽकामयत"(2.6) इति च, (यथा जीवाभिन्नत्ववचनानि ब्रह्मणो ज्ञानकर्तृत्वं प्रापयन्ति, तथा सोऽकामयत इति वचनमपि तत्प्रापयति इत्यत्र {अन्यथानुपपत्तिरूप) हेतुमाह - कामिनः इति) (गोविन्दानन्द - ननु कामकर्तृत्वम् इदं न ज्ञानकर्तृत्वम् इत्यत आह - कामिन इति। कामित्वे न ज्ञानकर्तृत्वम् अनुमेयम् इत्यर्थः) कामिनो ज्ञानकर्तृत्व-प्रसिद्धिः। (ब्रह्मणो ज्ञानकर्तृत्वप्राप्तौ फलितं दोषमाह - अत इति) अतो ज्ञानकर्तृत्वात् ज्ञप्तिः ब्रह्म इति अयुक्तम्। ('ज्ञानं ब्रह्म' इति वचनात् प्राप्तम् अन्तवत्वम् इत्यत्र उक्तम् अनित्यत्वप्रसङ्गं प्रपञ्चयिष्यन् इतश्च ज्ञप्तिः ब्रह्म इति अयुक्तम् इत्याह - अनित्यत्वेति) (सच्चिदानन्द - तदेवं ज्ञानशब्दस्य कर्तृत्वसाधनपक्षे अनुकूलतर्कं श्रुतिं चोपन्यस्य भावसाधनपक्षे प्रतिकूलतर्कमप्याह - अनित्येति) अनित्यत्वप्रसङ्गश्च। (ननु ब्रह्मणो ज्ञप्तिरूपत्वेऽपि कथं अनित्यत्वं ज्ञप्तेः नित्यचैतन्यरूपत्वाद् इत्याशङ्क्य हेत्वसिद्धिमाह - यदि नाम इति। यदि नाम अभ्युपगम्यते इत्यर्थः। लौकिकस्य ज्ञानस्य अन्तवत्वदर्शनात् तदरिक्त-नित्यज्ञान-अभावाच्च इति भावः) यदि नाम ज्ञप्तिः ज्ञानमिति भावरूपता ब्रह्मणः, तथापि अनित्यत्वं प्रसज्येत। पारतन्त्र्यं (जन्यत्वम्) च, धात्वर्थानां कारकापेक्षत्वात्, ज्ञानं च धात्वर्थः। (अनित्यत्वादिप्रसङ्गाद् ज्ञप्तिः ब्रह्म इति अयुक्तम् इति उपसंहरति - अतोऽस्य इति) अतोऽस्य (ज्ञानस्य इत्यर्थः) अनित्यत्वं परतन्त्रता च (सच्चिदानन्द - अयमभिप्रायः - अङ्गीकृतेऽपि ज्ञानत्वे तद्दोषाद् नैव मोक्ष्यसे। यत्कारणं ज्ञानं नाम धात्वर्थः क्रियारूपः, क्रिया च अनेककारकनिष्पाद्या इति तस्य कथङ्कारं परिच्छिन्नत्वं अनित्यत्वं वा वार्येत? अन्यापेक्षनिष्पत्तेः च तस्य पारतन्त्र्यमपि ध्रुवं प्रादुःष्यात्। एवं च भक्षितेऽपि लशुने न शान्तः व्याधिः

इत्याभाणकस्य गोचरीभवेः ब्रह्मणो ज्ञानत्वम् उररीकुर्वन्। तदेवं दोषस्य उभयपक्षसामान्यम् - इत्यतो वरं उक्तयुक्तिश्रुतिबलाद् ज्ञानकर्तृत्वमेव आश्रितम्।) ।

When Brahman is said atma, now you are in trouble he says. Because atma is well known as knower. I may not understand what is being said. Again, that Brahman desired. It means he is knower. Before you desire, you should know. So Brahman is knower as atma. So not jnapti is the meaning of jnanam. Many people have this conclusion because then only duality can be established. So these vakyas are celebrating vakyas for them. Again, even if you take as jnapti, then also the problems will be there. Because as dhatvartha, depending on karakas, it again will be anityam. Yadi nama means, suppose if accepted. Knowing means karta, karana, adhikarana (buddhi) etc will be there. So jnanam is paratantram. Being born at a give time, it is impermanent.

When it was said Brahman is atma, again two objections were raised that jnanam has to therefore mean knower. This objection is based on two reasons as follows.

Atma is well known as knower.

a Sruti is that that has reasoning in it (otherwise-untenable-logic)

The second objection is to show the defect of anitya in taking jnanam as root meaning.

ज्ञानं नित्यं, न कार्यम्

(उक्तचोद्यं ज्ञानस्वरूपविवेचनेनैव निरवकाशीकरोति - न इत्यादिना नित्यस्वरूपत्वादित्यन्तेन) (आत्मनो नित्य-चैतन्यरूपतायाः श्रुतियुक्तिसिद्धत्वाद् ज्ञप्तिः ब्रह्म इति अत्र आत्मचैतन्यमेव ज्ञप्तिः विवक्षिता, अतो न अनित्यत्वादिप्रसङ्गः, आत्मनष्ट्र साक्षी चेता केवलो निर्गुणः च इति वचनात् ज्ञानकर्तृत्वम् असिद्धम्। जानामि इति अनुभवस्तु बुद्धितादात्म्यकृतः, ध्यायतीव लेलयतीव इति च श्रुतेः, तथा च न आत्म-अभिन्नत्वाद् ब्रह्मणो ज्ञानकर्तृत्वप्रसङ्गः। कामयितृत्ववचनमपि ब्रह्मणो मायोपाधिप्रयुक्तमेव, न स्वतः इतयाशयेन समाधत्ते - न इति। ज्ञप्तेः आत्मस्वरूप-अव्यतिरेकत्वे सति तस्यां ज्ञप्तौ कार्यत्वस्य उपचारमात्रत्वाद् ज्ञप्तिरूपस्य ब्रह्मणो न अनित्यत्वादिप्रसङ्गः इत्यर्थः) न। (उक्तं विवृणोति - आत्मनः इति। चैतन्यरूपा ज्ञप्तिः आत्मनो न भिद्यते मानाभावात्, अतो नित्यात्मस्वरूपत्वादिह विवक्षिता ज्ञप्तिः नित्या एव इत्यर्थः।) स्वरूप-अव्यतिरेके कार्यत्व-उपचारात्। आत्मनः स्वरूपं ज्ञप्तिः न ततो व्यतिरिच्यते। अतो नित्या एव। (ननु तर्हि विषय-अवभासिकायां ज्ञप्तौ कथं कार्यत्वप्रसिद्धिः इत्याशङ्क्य कार्यत्व-उपचाराद् इत्याह - तथापि इति। कार्यवृत्तिसंसर्गात् कार्यत्वेन उपचर्यते इति शेषः।) तथापि (वृत्तेः कार्यत्वं साधयति - बुद्धेः इति।) (सच्चिदानन्द - आत्मस्वरूपस्य एव सतः ज्ञानस्य कथं उत्पत्यादिकम् उपपादनीयमिति? अत्र ब्रूमः - बुद्धेः इति) बुद्धेः[15] उपाधिलक्षणायाः (प्रत्यगात्म-उपाधिभूतायाः इत्यर्थः)

[15] यदा यदा विषयोपलब्धिः, तदा तदा बुद्धेः तत्तद्विषयाकारत्वेन परिणामः जायते, स एव च परिणामः धात्वर्थः विक्रियात्मकः, स एव च जायते, विनश्यति इत्यादिव्यवहारविषयः, न तु आत्मनः स्वरूपभूतं ज्ञानम्। तथापि यदा यदा विषयाकारेण परिणामः बुद्ध्याः तदा तदा तत्तत्प्रत्ययः स्वतःसिद्ध-आत्माश्रयेण एव जायमानः तज्ज्ञानेन व्याप्तः एव

चक्षुरादिद्वारैः विषयाकारपरिणामिन्याः ये शब्दाद्याकार-अवभासाः (शब्दादिविषयगोचराः {अवभासाः इति वृत्तयः, विषयव्यञ्जकत्वाद् आभासोक्तिः} शब्दादि-अवभासकत्वेन प्रसिद्धाः परिणामाः ते आत्मस्वरूपस्य विज्ञानस्य विषय-अवभासकचैतन्यस्य विषयभूताः उपाधिभूताः इत्यर्थः। तथा च उपाधिभूत-वृत्तितादात्म्याद् आत्मस्वरूपभूतायां ज्ञप्तौ कार्यत्व-उपचारः इति भावः। आत्मविज्ञानस्य विषयभूताः ये शब्दाद्याकार-अवभासाः ते उत्पद्यमानाः सन्तः आत्मविज्ञानव्याप्ताः एव उत्पद्यन्ते इति योजना। {विषयव्यञ्जकत्वं संपादयति - ते इति} ते आत्मविज्ञानस्य विषयभूताः उत्पद्यमानाः एव आत्मविज्ञानेन व्याप्ताः उत्पद्यन्ते। अत्र वृत्तीनाम् आत्मविज्ञानेन व्याप्तिः वृत्तिचैतन्ययोः अवभास्य-अवभासकभाव-प्रयोजकतादात्म्य-संबन्धरूपा विवक्षिता। अत एव आह - तस्मादिति। उक्तव्याप्तिः तच्छब्दार्थः। Normally in अवभास्य-अवभासकभाव relation, there is no तादात्म्यरूपसंबन्ध like between light and flower illumined by light, because here one is pervasive) तस्माद् आत्मविज्ञानभास्याः च { आत्मस्वरूपविज्ञानस्य आभासः प्रतिबिम्बनं येषु ते तथोक्ताः} (भावसाधनज्ञानशब्द-वाच्यत्वमपि वृत्तीनामेव इत्याह - विज्ञानेति।) विज्ञानशब्दवाच्याः च (जानाति इत्यत्र धात्वर्थमपि तासामेव कारकपारतन्त्र्याद् इत्याह - ते इति) ते, धात्वर्थभूताः (सन्तः अपि इति शेषः), (ननु चक्षुरादिकरणजन्यानां ज्ञानानां वैशेषिकादिभिः आत्मधर्मत्व-अङ्गीकाराद् बुद्धिधर्मत्वम् अयुक्तम्, अत आह - आत्मन एवेति। आत्मनो विकाररूपाः सन्तः तस्यैव धर्माः गुणाः इति श्रुतितात्पर्य-अनभिज्ञैः कल्प्यन्ते, न तु परमार्थतः आत्मधर्मत्वं तेषां "कामः संकल्पः विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिः ह्रीः धीः भीः इत्येतत् सर्वं मनः एव (बृ.१.५.३, मै ६.३०) इत्यादिश्रुत्या जन्यज्ञानादीनां मनोधर्मत्वप्रतिपादनाद् आत्मनो निर्गुणत्वप्रतिपादनाच्च इत्यर्थः।) आत्मन एव धर्माः विक्रियारूपाः इत्यविवेकिभिः परिकल्प्यन्ते। (एवं लौकिकज्ञानस्य कारकपारतन्त्र्यादिकं निरूप्य स्वरूपज्ञानस्य तद्वैपरीत्यम् उपपादयति - यत्तु इति।तु-शब्दः स्वरूपज्ञानस्य वृत्तिवैलक्षण्यार्थः। "सत्यं ज्ञानम्" इत्यत्र ज्ञानपदलब्धं यज्ज्ञानं तत्सवित्रादेः प्रकाशादिकमिव ब्रह्मस्वरूपाद् आत्मनोऽव्यतिरिक्तम् आत्मस्वरूपमिति यावत्। अतो ब्रह्मणः स्वरूपमेव इत्यर्थः।) यत्तु ब्रह्मणो विज्ञानम्, तत् सवितृप्रकाशवत् (सच्चिदानन्द - सविता प्रकाशस्वरूपः, न तु प्रकाशगुणः प्रकाशक्रियावान् वा) अग्न्युष्णवच्च (सच्चिदानन्द - यथा वा अग्निः उष्णस्वभावः, न तु उष्णगुणः, दाहक्रियावान् वा) ब्रह्मस्वरूप-अव्यतिरिक्तं स्वरूपमेव। (ननु आत्मस्वरूपत्वेऽपि ज्ञानस्य कथं ब्रह्मस्वरूपत्वं, कारकापेक्षस्य तस्य ब्रह्मत्व-अयोगाद् इत्याशङ्क्य आह - तन्न इतिः। नित्य-आत्मस्वरूपादिति हेत्वर्थः।) तन्न कारणान्तर-सव्यपेक्षम् (सच्चिदानन्द - बुद्धेरिव आत्मनः विषयाकारेण परिणतिं वा विषय-संयोगेन फलजननं वा नैवापेक्षते नित्यस्वरूपत्वात्।) नित्यात्म-स्वरूपत्वात्।

The consciousness is not different from atmasvarupa, because it is not an attribute of atma, it is atma. If it is an attribute of atma, is it consciousness or inert. If inert, it can not have the quality of consciousness. So it is consciousness. Being non-separate from one's own svaurpa,

---

जायते, तद्भानभासितग्रा।तेन प्रत्ययेन तदाकारमिव गतः अपि आत्मा तदव्यतिकीर्णः एवावतिष्ठते, स्वाभाविकज्ञानप्रकाशनेन अप्रयत्नेन एव स्वाश्रितससर्वबुद्धिप्रत्ययप्रकाशनात् प्रदीपाद्यालोक इव स्वाश्रितप्रकाशकः। Refer उ.सा १६.५, ६) (सच्चिदानन्द)

there is figurative saying of karyatvam, being dhatvartha. Upacara is lakshana. What is this consciousness? What you can say? It is ear of the ear. In the perception of sound, that which makes the ears hear is that. It is evident. That you see me is enough. That is consciousness. It is very simple. I want something little hard. We have to use the word jnanam to point out jnapti. That is why it used along with satyam and anantam. Jnanam should be satyam, abaditam. That which is abatitam is jnanam is pure consciousness. Retaining the dhatvartha and accepting its limitations and at the same time giving up the popular meaning through other two words , jnanam word is used.

Jnanam is the very nature of atma. The bonal structure of atma is consciousness. There is no structure. There is no atmanah here. It is linguistic. Sixth case is helplessly used. Consciousness does not stand apart from atma. Svarupa he will talk about later is agni-ushnavat. So it is nitya, not born, being svarupa of atma. What is born is vritti. It is anitya. The frame keeps changing. You are able to see the flow etc. So many frames. Mind is not moving along with the hands. You see the motion because the mind's frames keep on changing. So you say Swami's hand is moving. That caitanya is nityam. Mind's motion is seen by which consciousness, that is nitya. Even the time flow is appreciated by which consciousness, it is not bound by time.

We have to understand this consciousness only with this changing buddhi. The variable is taken as atma. Anything born is to be illumined to know that it is born. So caitanyam precedes all karya. Before a vritti is born, atma caitanyam is there for the thought to be born. It is nitya. How it is unborn is gong to be said.. With the vritti alone atma is revealed, pratibodha+ Vritti becomes lakshana for the caitanya, the lakshya, That is how it is pointed out. No other way is there. Brahman is present in all situations. No particular experience is necessary for appreciation of Brahman. Don't wait for the knowledge to happen.

Even though this jnanam is nitya, how there is karyatva upacara is there? Because, buddhi is upadhi for atma. upa samipe, samipasthe vastuni svadharman Adhatte iva iti adhih. That which is near and gives its attributes to the other is upadhi. If it really gives dharma like salt added to milk it is not upadhi. It is as if. Buddhi is like upadhi. What kind of buddhi? That which undergoes change. What kind of change? A change in keeping with the object perceived. How it takes place? Through senses like eyes. or through memories also. Bur originally how did it get memory? By eyes alone. These vrittis. of the buddhi which is the upadhi of Atma. They are always objects illumined. By what? by the consciousness. Is there any distance between the caitanyam and the object. What is the distance between the object and the light that which lights up. It is very important here. As they are born, they arise being pervaded by the consciousness alone. So what is the distance between vritti and the ciatanyam. So these vrittis are the direct meaning of the word jnanam. They are the meaning of the root. to know. They are the attributes of atma iti it is imagined by ignorants. What is the vritti and what is the caitanyam iti they are not able to distinguish. Vritti itself is taken as atma. Not merely the atma. The object itself of the knower is taken to be the atma. Atma

becomes the first karaka and connects to all other karakas. The jnanam of Brahman is its nature and non separate from it. Like the heat of fire No sun without light. No hot ice.

ब्रह्मणः सर्वज्ञता

(ननु ज्ञानस्य ब्रह्मरूपत्वे सर्वज्ञत्वश्रुतिविरोधः, तस्य अकार्यतया ब्रह्मणस्तत्र कर्तृत्व-असम्भवात्, न च बुद्धिवृत्युपहितत्वेन स्वरूपज्ञानेऽपि कार्यत्व-उपचारः उक्तः इति वाच्यम्। तावता बुद्ध्युपाधिकस्य जीवस्य ज्ञानकर्तृत्वलाभेऽपि ब्रह्मणस्तदलाभात्। जीवब्रह्मणोरभेदे अपि कल्पितभेद-अभ्युपगमेन धर्मसाङ्कर्य-अयोगाद् इत्याशङ्क्य ब्रह्मणः सर्वज्ञत्वं सर्वसाक्षित्वरूपमेव अस्तु, कर्तृत्वश्रुतेः औपचारिकत्व-उपपत्तेः इत्याशयेन सर्वसाक्षित्वम् उपपादयति - सर्वभावानां च इति।) (आ.गिरि - नित्यं चेज्ज्ञानं तर्हि तत्र ब्रह्मणः कर्तृत्वाभावे कथं सर्वज्ञत्वम् इत्यत आह - सर्वभावानां च इति। संविद्-अव्यवधानमेव हि विषयस्य सिद्धिः, सर्वं च संवित्-स्वभावेन ब्रह्मणा अव्यवहितमिति सर्वज्ञं ब्रह्म उपचर्यते इत्यर्थः) {सर्वज्ञतायाः विषयव्यवधानरूपप्रतिबन्धः नास्ति इत्याह - सर्वेति} सर्वभावानां च तेन अविभक्तदेशकालत्वात्[16] (तेन ब्रह्मणा अविभक्तौ विभागरहितौ देशकालौ येषां ते तथोक्ताः तेषां भावः तत्वं तस्मान्न तस्य विप्रकृष्टादिकम् इत्यर्थः।)। (सर्वपदार्थानां ब्रह्म-अविभागत्वे हेतुः कालाकाशादि इति। सर्व-कल्पनाधिष्ठानत्वाद् इत्यर्थः) {कालदेशादिव्यवधानप्रतिबन्ध-निमित्त-सर्वज्ञताहानिरपि नास्ति इत्याह - कालेति। कालादेः अपि कारणत्वात्, कारणस्य कार्य-अव्यवधानत्वात् इति भावः} काल-आकाशादि-कारणत्वात्, (स्वप्रकाशचिद्रूपतया ब्रह्मणः अतिस्वच्छत्वाद् न तस्य अप्रकाश्यं किंचित् सूक्ष्मम् अस्ति इत्याह - निरतिशयेति) {विषयसूक्ष्मतानिमित्तः प्रतिबन्धः अपि नास्ति इत्याह - निरतिशयेति} निरतिशयसूक्ष्मत्वाच्च (हेतुत्रयसिद्ध्यर्थं पुञ्जीकृत्य आह - न तस्य इति) न तस्य अन्यद्विज्ञेयं, सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वा अस्ति। (सर्वपदार्थसंसर्गित्वाद् इत्यर्थः) तस्मात्तु सर्वज्ञं तद्ब्रह्म {सर्वविषय-अवभासनक्षमत्वादेव तज्ज्ञानम् सर्वज्ञत्वम्।} (वस्तुतस्तु जीवस्य बुद्ध्युपाधिवशात् मुख्यज्ञातृत्वादिवद् ब्रह्मणोऽपि मायोपाधिवशात् मुख्यमेव सर्वज्ञत्वं कामयितृत्वादिकं च संभवति इति विशेषसंग्रहार्थस्तु-शब्दः। तदुक्तं वाक्यवृत्तौ आचार्यैः एव - मायोपाधिर्जगद्योनिः स सर्वज्ञत्वादिलक्षणः इति)।

It is *kāraṇa* of everything. No final satyam is there - you cannot say. Because everything is known as “is”. If there is no final cause, there will be no finality in perception. It must exist by itself. So it does not depend on any thing else. It is so because it is nitya atma svarupa. Again nothing is separate from atma. How are you going to miss this atma. All objects are nonseparate from time and space. Time and space are not separate form Brahman. Because Brahman is their cause. No object that is not illumined by Brahman. May be there some body said. If you say there is an object. is it known or unknown. Either way it is illumined. When it is known, it is illumined. Without illumination can you know? There is no past or future. It is current thought of past or future. So atma is omniscient. Because nothing is away from atma.

[16] Everything that exists is nonseparate or undivided from Brahman in time and space.

(कारकनिरपेक्षं स्वरूपज्ञानमस्ति इत्यत्र मन्त्रब्राह्मणवाक्यानि प्रमाणयति - मन्त्रेत्यादिना) (आद्यश्रुतिः बरह्मणो ज्ञाने कारणान्तर-व्यपेक्षाभावम्, नित्यज्ञस्वभावम्, सर्वकारणत्वेन सर्वव्यापकत्वात् देशकालादिव्यवधानप्रतिबन्धाभावं च दर्शयति। द्वितीया तु अद्वितीयस्वभावेन तस्य नित्य-अविपरिलुप्तविज्ञानस्वरूपताम् आचष्टे।) मन्त्रवर्णाच्च (आ.गिरि - नित्यं ज्ञानं ब्रह्मणि विद्यते {तादात्म्येन} इत्यत्र मन्त्रसंमतिमाह - मन्त्रवर्णाच्च इति) "अपाणिपादो (पाणिपादौ अस्य न इति) जवनो ग्रहीता (अपाणिर्ग्रहीता, अपादो जवनः) पश्यत्यचक्षुः स शृणोत्यकर्णः। (अमनस्कः सन्) स वेत्ति वेद्यं (परस्य न अन्य-अवभासकः अस्ति, तस्य स्वप्रकाशत्वाद् इत्याह - न च इति) न च तस्यास्ति वेत्ता तमाहुरग्र्यं (अग्रे सृष्टेः पूर्वकाले भवम् अग्र्यम्) (प्रथमं सर्वकारणत्वात्) पुरुषं (पूर्णम्) महान्तम्"। (श्वे. ३.१९) इति। न हि विज्ञातुः विज्ञातेः विपरिलोपो विद्यते, अविनाशित्वात् (विनाश-अयोग्यत्वात्) (itself no end), (विज्ञातुरात्मनो या विज्ञातिः स्वरूपभूता संवित् तस्याः विपरिलोपो विनाशो नास्ति, अविनाशित्वात्, नाशसामग्रीशून्यत्वात् इतयर्थः) न तु तद्द्वितीयमस्ति (बृ.उप ४.३.३०) (from outside also no destruction as no second thing) इत्यादिश्रुतेः च।

ज्ञानरूपस्य ब्रह्मणो न धात्वर्थता, न च ज्ञानकर्तृता

(आ.गिरि - ब्रह्म अनित्यं ज्ञानत्वाद् लौकिकज्ञानवद् इत्यादि चोद्यमपि उक्तन्यायेन निरस्तम् इत्याह - विज्ञातृ इति। लौकिकज्ञानस्य करणादिसापेक्षत्वाद् अनित्यत्वम्, आत्मस्वरूपं तु ज्ञानं न करणादिसापेक्षं सकलकरणव्यापार-उपरमेऽपि सुषुप्ते भावाद् अन्यथा सुषुप्तिसिद्ध्यनुपपत्तेःपरामर्श-असंभवप्रसङ्गाद् अतः श्रुतितात्पर्यगम्ये अर्थे न समान्यतो दृष्टस्य {कार्यकारणभाव-अनापन्नहेतुसाध्यकस्य यथोक्तानुमानस्य} प्रवेशः इति भावः) (सच्चिदानन्द - ज्ञानस्य भावसाधनतास्वीकारे ज्ञानस्य पारतन्त्र्यम्, अनित्यत्वं च स्याद् इत्युक्तदोषं परिहरति - विज्ञातृ इति। ज्ञानस्य विज्ञातृस्वरूपत्वादिति भावः। भावसाधनता कर्तृत्वादिकारकत्वनिवारणार्थम् उक्तम्, न तु भावार्थतायां तात्पर्येण) (ज्ञप्तेः आत्मस्वरूपत्वेन कारक-अनपेक्षत्व-फलमाह - विज्ञातृस्वरूपेति) विज्ञातृस्वरूप-अव्यतिरेकात् करणादि-निमित्त-अनपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेऽपि नित्यत्व-प्रसिद्धिः। अतः (आ.गिरि - नित्यात्मस्वरूपत्वादेव) नैव धात्वर्थः तत् (तत् आत्मस्वरूपं ज्ञानम्), (न धात्वर्थः इत्यत्र अतःशब्दोक्तं हेतुमाह - अविक्रियेति। नित्यत्वाद् इत्यर्थः। कारकसापेक्षक्रियायाः एव धात्वर्थत्वादिति भावः) अविक्रियारूपत्वात्। (ज्ञानस्य नित्यत्वादेव तत्र ज्ञाने ब्रह्मणः कर्तृत्वमपि आपादयितुमशक्यम् इत्यर्थः) {ज्ञातृज्ञानयोः अव्यतिरेकोक्त्या एव} अत एव च न ज्ञानकर्तृ (आ.गिरि - नित्यत्वादेव ज्ञानस्य न तत्र कर्तृत्वमपि ब्रहमणः आपादयितुं शक्यते)।

There is a mantra-description. This atma has no hands or legs. Yet it is fast mover and holds things. Through upadhi he does this. He sees without eyes. That is the point here. He has no ears and yet hears. See the power of atma! There is no power or like that. It is just the consciousness. He makes the hearing possible. He knows anything knowable. He does not become an object of knowledge. Nobody objectifies atma. To know it, there must be another source of caitanyam. It is not there. It is mere presence. There is no functioning of atma. Everything takes place in its presence. So it is the first being. Even before the creation it is. It

is atma. It is Lord. There is mahavakya here. This atma is mahantam etc. So atma is not dependent on any instruments like sense and mind. The verb of seeing etc does not indicate any action. If so, then there will be modification. So through the upadhi, it sees. Eyes is upalakshana for mind also.

There is no change or destruction for the caitanyam which is the svarupa of knower. Because it is not a karya. If it is born, it will die. A vritti is kshanika, it will die being a product. They take this vritti as atma. That vritti is dhatvartha. It becomes lakshana for the lakshya that is atma. Probably something from outside can destroy this consciousness. No. There is no second object. Mithya does not have the capacity to destroy the real. Pot can not destroy the clay. So this jnanam is non-separate from the svarupa of the knower and svarupa does not undergo any change and it does not depend on any factor for its existence. Vritti depends on factors like knower etc. Or knower depends on karanam etc. But here no apeksha. Vritti arises pervaded by jnanam iti we saw. That pervasiveness of atma in the virtti is called abhasa. Abhasa is not different from caitanyam. Since the virtti keeps changing, and it is inert by itself, that is why vritti cannot see atma. That vritti is animated by the satyam jnanam anantam Brahma. So every virtti is that Brahman alone. No vritti is separate from Brahman. So knower depends on vritti but knower's svarupa does not depend upon it. So it is answered here that jnanam is really not dhatvartham, and so there is no anityatvam. because it is only lakshanam. This is possible because where vritti jnanam is there, there alone Brahman is there. Because not subject to change, so it is not dhatvartha. At the same time jnanam is used. So we have to make use of this word and at the same time, change is negated retaining dhatvartha, This is possible with the help of other two words. So it is not the direct meaning of the word jnanam. We can point out by implication because it pervades the vrittis. So the upadesa is that it is pratyagatma caitanyam.

ब्रह्मणोऽपदार्थत्वम् अवाक्यार्थत्वं च

तस्मादेव च (तत्ज्ञानस्वरूपं ब्रह्म ज्ञानपदवाच्य-लौकिकज्ञान-विलक्षणत्वादेव ज्ञानपदवाच्यमपि न इत्यर्थः) न ज्ञानशब्दवाच्यमपि तद्ब्रह्म। (कथं तर्हि ज्ञानं ब्रह्म इति सामानाधिकरण्यम्। तत्राह - तथापि इति। वाच्यत्व-अभावेऽपि इति अर्थः।) तथापि तदाभासवाचकेन (ज्ञान-आभास-वाचकेन इत्यर्थः)। (कोऽसौ ज्ञानाभासः इत्याकाङ्क्षायां तदेव विवृणोति - बुद्धीति। बुद्धिपरिणामरूपवृत्तिज्ञानवाचकेन इत्यर्थः। वृत्तेः जडायाः चैतन्यतादात्म्यमन्तरेण विषय-अवभासकत्व-अयोगात् ज्ञानाभासत्वम् इति भावः।) बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते (सच्चिदानन्द - सत्यादिशब्दाः स्वं स्वं वाच्यमात्रं निर्देष्टुं समर्थाः अपि स्वस्वेतरशब्दद्वय-सान्निध्य-प्रभावद् लौकिकं वस्तु निर्देष्टुम् अपारयन्तः स्वस्ववाच्याद् विलक्षणं ब्रह्मेति यत्तावद् उपदिशन्ति, तदेतद् लक्षणावृत्तिमार्गे एव स्थित्वा)। (पूर्वोक्तं वाच्यत्व-अभावम् अनूद्य तत्र हेत्वन्तरमाह - न तु उच्यते इत्यादिना। अर्थेषु शब्दानां प्रवृत्तिहेतुत्वेन प्रसिद्धाः ये जात्यादायः धर्माः तद्रहितत्वाद् ब्रह्मणः इत्यर्थः) न तु उच्यते। शब्दप्रवृत्तिहेतु-जात्यादि-धर्म-

रहितत्वात् (सच्चिदानन्द - जाति-द्रव्य-गुण-क्रियासंबन्धा हि शब्दप्रवृत्तिहेतवः। ते तु ब्रह्मणि नैव विद्यन्ते। तदेवं अन्योन्य-नियम्य-नियामकत्वं प्राप्य सत्यादिशब्दवाच्यात् विलक्षणं निरतिशयसत्यादिलक्षणं वस्त्वस्ति किञ्चिदिति सूचयित्वा यावद्विरमन्ते ते तावत् सर्वहेयोपादेयविषयात् विनिवर्त्तिता वेदितुः बुद्धिः यो वेद निहितं इति च श्रुत्वा स्वप्रत्यगात्मन्येव विश्राम्यति।) (तद्रहितत्वे हेतुमाह - सत्यानन्तेति) सत्यानन्तशब्दाभ्यां सामानाधिकरण्यात्[17] (ब्रह्मशब्दस्य इति शेषः। सत्यानन्तपदाभ्यां बाधायोग्यत्व-त्रिविधपरिच्छेदराहित्य-समर्पकाभ्यां ब्रह्मणो निर्विशेषत्व-अवगमात् इत्यर्थः)। (अत एव सत्यशब्दस्यापि न वाच्यं ब्रह्म इत्याह - तथा इति) तथा सत्यशब्देनापि। सर्वविशेष[18]-प्रत्यस्तमित-स्वरूपद्वाद् (सर्वविशेषरहित-स्वरूपत्वादेव इत्यर्थः) ब्रह्मणः। (कथं तर्हि सत्यं ब्रह्म इति सामानाधिकरण्यं, तत्राह - बाह्येति। बाह्यं लोकसिद्धं यत्सत्तासामान्यं सत्ताजातिस्वरूपं तद्वाचकेन सत्यशब्देन बाध-अयोग्यं वस्तु लक्ष्यते इत्यर्थः। यद्वा पूर्वं विकारेषु अव्यभिचारितया वर्त्तमाने वस्तुनि रज्ज्वादौ सत्यशब्दप्रसिद्धेः उक्तत्वाद् लौकिकसत्यवस्तुवाचिना सत्यशब्देन परमार्थभूतं वस्तु लक्ष्यते, अतः सत्यं ब्रह्म इति सामानाधिकरण्यम् उपपद्यते इति बोध्यम्।) बाह्यसत्ता-सामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्म इति। न तु (केवलस्य परमार्थवस्तुनः प्रागनुपस्थितत्वेन शक्तिग्रहाभावात् इति भावः) सत्यशब्दवाच्यं ब्रह्म। (सत्यादिपदत्रय-व्याख्यानमुपसंहरति - एवमिति) एवं[19] (नियम्य-नियामकभावफलमाह - सत्यादि इति।स्वस्व-वाच्यार्थाद् निवर्त्तकाः च भूत्वा ब्रह्मणो लक्षणस्य सच्चिदद्वितीयस्वरूपस्य समर्पकाः भवन्ति इत्यर्थः) सत्यादिशब्दाः इतरेतर-संनिधावन्योन्य-नियम्य-नियामकाः सन्तः सत्यादि-शब्दवाच्यात् निवर्तकाः लक्षणार्थाः च भवन्ति। (लक्षणवाक्यार्थ-विचारम् उपसंहरति - अतः इति) अतः सिद्धम्, (आ.गिरि - शक्त्या बोधकशब्द-अनङ्गीकारात् अवाच्यत्वम्, सकल-अनिष्ट-व्यवच्छेदेन एकस्यैव लक्ष्यत्व-अभ्युपगमाच्च गुण-गिण्यादिसंभेदरूपवाक्यार्थ-वैलक्षण्यं च ब्रह्मणः {अखण्डवाक्यार्थत्वरूपम् इत्यर्थः । न तु संसृष्टरूपत्वम्} सिद्धम् इत्यर्थः) **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (2.4), "अनिरुक्तेऽनिलयने" (2.7)** (निरुक्तम् वाच्यम्, तद्भिन्नम् अनिरुक्तम्) इति च अवाच्यत्वम्। नीलोत्पलवद् (सत्यादिविशेषणविशिष्टस्य ब्रह्मणः सत्यादिवाक्यार्थतायाः "न विशेषणप्रधानान्येव" इत्यत्र "लक्षणार्थं च वाक्यम् इत्यवोचाम" इत्यत्र च तात्पर्यतो निरस्तत्वाद् ब्रह्मणो नीलोत्पलवाक्यार्थवैलक्षण्यं च सिद्धम् इत्यर्थः। सच्चित् एकरसं ब्रह्म प्रकृतं भेदवर्जितम्। मन्त्रस्य प्रथमे पादे तात्पर्येण निरूपितम्) अवाक्यार्थत्वम् च ब्रह्मणः {ब्रह्मणः भेदसंसर्गहीनत्वात् न पदवाक्यार्थता इति भावः}।

---

[17] Like a person in sleep is woken up by the words without seeing the connection between abhidhana and abhidheya, so too these words bring about knowledge. (see Br.Varttikam 4.4.696-698)

[18] सत्ता यस्य अस्ति तत्सत्यमिति लोकरूढिः। सत्ता च अनुगतरूपं सामान्यम्, व्यावृत्ताः सत्ताविशेषाः (सत्तायाः विशेषा आश्रयाः व्यक्तयः इति यावत्)। स च अयम् अनुवृत्त-व्यावृत्तभावः न वस्तु, परस्परापेक्षसिद्धत्वाद् अतः यस्मिन्नयं व्यावृत्त-अनुवृत्त-भावः कल्पितः तद् अव्यावृत्त-अननुगतं ब्रह्म लक्ष्यते। (आ.गिरि)

[19] ज्ञानेन विशेषणात् सत्यशब्दः न जडे कारणे वर्तते। सत्येन विशेषणात् ज्ञानशब्दः न विषयसापेक्षे ज्ञाने वर्तते।ज्ञानेन विशेषणाद् न अनन्तशब्दः ज्ञातृव्यतिरेके वर्तते।ततश्च सत्यादिशब्देन यल्लौकिकं वाच्यं तद्विलक्षणेन भवितव्यमिति संभावयन्तः सकललौकिक-अध्यास-अधिष्ठानं ब्रह्मत्वेन लक्षयन्ति इत्यर्थः। (आ.गिरि)

> And because of this, again, it cannot even be directly pointed out by the word "jnanam." Still Brahman is expressed impliedly, but not denoted, by the word "jnanam" which really stands for a semblance of consciousness, as referring to an attribute of the intellect; for Brahman is devoid of such features as genus etc which alone are the enabling factor for one to use the words. Similarly Brahman is not directly pointed out even by the word "satyam" since Brahman, by nature, is devoid of all distinctions. In this way, the word "satyam" which refers to external reality in general, can impliedly point to Brahman in such expressions as "Brahman is truth", but it cannot directly mean it. Thus the words "satyam" etc occurring in close proximity to each other and controlling and being controlled in turn by each other distinguish Brahman from the objects directly meant by the words "satyam" etc. and thus become defining words. So in accordance with the Vedic texts "falling to reach which, the words along with the mind come back" and "in the inexpressible, in the free of support, .." it is established that Brahman is not available for being directly pointed out and that unlike the construction of the expression, "a blue lotus", Brahman is not to be construed as the purport of any sentence.

Brahman is not the immediate meaning of the word jnanam. Then why do you use the word jnanam? Why do you talk?. So maunavyakhya+ It is beyond words. So silence is the language of the god. Words are not his language? We should look each other. It is all problem. Though not meaning of the words, still, by the word jnanam, which is jnana-abhasa vacaka, word, it is implied. Buddhi parinama is vritti and that is the meaning of the word jnanam. How it becomes lakshana. Because it is jnana-abhasa. Where there is abhasa, there the vastu is. Like pointing out the devadatta through the reflection in the mirror. The presence of caitanyam is invariable. Changing vrittis are abhasa and it becomes lakshana for non-changing invariable pervasive caitanyam. So by Jnanam it is pointed out. It is not vacya of jnanam. It is implied.

So they say Brahman is not defined but indicated. Like Haridwar is indicated. by the arrow mark. You have to walk towards the direction of the arrow mark. So you have to travel, they say. No. Knowledge is immediate. Abhasa and bimba where there is distance? There in the mirror e.g., there can be. Here the peculiarity is that one is pervasive. Light is limited. So there is distance between light and object. Here not. It is not direct meaning because there is no access for words here. In those objects it is there where they have the features with reference to which words can have access. They are jati etc. Sabdapravritti is due to what. That is called sabdapravritti hetu. Jati is possible only if many Brahmans are there. If only one vastu, no jati is there. Guna is not there. It should be a quality obtaining in an object. White cow. Like no attributes. Satyam etc are not gunas. They are for whom? For Brahman. That is satyam etc. How can satyam be quality of satyam. No action in Brahman because no change possible in Brahman. Brahman is not creator but creator is Brahman. He becomes creator through maya upadhi. You escape with maya, they say. That is how it is. What is your teeth? It is calcium. Out it is calcium. Inside it is teeth. You loose is your teeth. You prove one object as existing on its own. The whole creation is maya. How can the as though cloth covers me. What it covers is as though. That is body also is as though. It is all statement of facts.

People don't understand mithya properly. Through action you can point out, but Brahman does not have any action. No sambandha also.

It has apposition to satyam and ananta. So it is not knower. So parinama and limitation is negated leading to svarupa knowledge. Satya is born of "as" root. Is means anytime may go. अस् means time walks in. Asit also possible. Bhavishyati also. So asti has full of tenses. Lat is followed by old lit. Lit is lit. Past is past. Gone forgotten is paroksha lit. Gone but remembered is lang. Even lang becomes lit. (need not be). One good thing about them is once upon a time it was lat. All future also, once it will become lat. All are only lat. In all is, time is there. That is universal satta. In any object, it is there. But for Brahman no features are there in satta. Name and form is visesha. Brahman is satyam means it is not one of the things in the world. In any other object is, that is without visesha is Brahman. In time, in place and in a form an object is. Similarly Brahman is not. Because anantam is there.

Because of this reason also. by sthula sarira born of food alone, which occupies a given place in a given time and given form, every body is distinguishable, so by this alone, all beings do not gain the existence. Annamaya becomes upadhi for pranamaya. In anatomy department, you have fomelin tank? Lot of bodies floating for dissection. For first year students. They don't have atma, i.e., jiva. From the standpoint of annamaya pranamaya becomes atma. Then by what they become one with self. Because of pranamaya. Pranamaya becomes universal in all beings. Life is common in everything, whether ant or you. So it is all pervasive. So it is pratyaksham Brahma. By the one i.e. Prana which pervades all bodies. That which obtains in sthula sarira. They all become possessed of self. Why sadharana? Because all pervasive.. That means pranamaya is atma? No Sruti will say no. Anyontaratma. But not for anandamaya. The bhoktas svarupa is atma. Because it is not paricchinna. By that atma therefore all gain atmatvam. All these atmas are set up by ignorance. Whether they know or not, this is the vastu sthiti that atmatvam of previous kosas are gained by later kosas. Like the dhanya which has many covers are there, similarly, atma has many kosas. Which atma? which is satyam etc. svabhavikena means svarupena. It is uncreated. Upto anandamaya it is mithyatma. Outside body they are all gaunatma. So that satyam+ alone is real atma. The earlier atmas become mithya only when you see the subsequent one as anyontara atma.

प्राणोपासनफलम्

"प्राणं देवाः अनु प्राणन्ति" इत्याद्युक्तम्। तत्कस्मादित्याह (तत्प्राणस्य सर्वप्राणिचेष्टाहेतुत्वं कस्माद् इत्याकाङ्क्षायाम् आह इत्यर्थः) - प्राणो हि यस्मात् भूतानां प्राणिनाम् आयुः जीवनम्, (प्राणस्य सर्वभूतजीवनहेतुत्वे कौषीतकिश्रुतिसंवादमाह - यावद्ध्यस्मिन् इति) - "यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदेवायुः" (कौ.उप ३.२) इति श्रुत्यन्तरात्। तस्मात्सर्वायुषम् सर्वेषामायुः सर्वायुः सर्वायुरेव सर्वायुषम् इत्युच्यते। "तस्मात्सर्वायुषम् उच्यते" इति वाक्येन प्रणस्य सर्वायुष्ट्वं लोकप्रसिद्धिः उच्यते इत्यभिप्रेत्य तां विवृणोति - प्राणापगमे इति) प्राणापगमे मरणप्रसिद्धेः। प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य। ('सर्वमेव त आयुः यन्ति' 'ये प्राणं ब्रह्मोपासते' इति वाक्यद्वयमर्थक्रमेण अवतार्य व्याचष्टे - अत इत्यादिना। प्राणमयस्य अन्नमयं प्रति आत्मत्वात् सर्वभूतायुष्ट्वाच्च इत्यतःशब्दार्थः।) अतः अस्माद् (अस्मादित्यस्य चाक्षुषप्रत्यक्षसिद्धादित्यर्थः) बाह्याद् असाधारणाद् (परिच्छिन्नाद् इतयर्थः) (आ.गिरि - व्यावृत्तस्वरूपात्) अन्नमयाद् आत्मनोऽपक्रम्य (अपक्रमणम् {तत्र अन्नमये} आत्मत्व-बुद्धिपरित्यागः। तत्र हेतुत्वेन चाक्षुषत्व-बाह्यत्व-परिच्छिन्नत्व-विशेषणानि उपात्तानि इति मन्तव्यम्।) अन्तः साधारणं (आ.गिरि - सर्वेन्द्रिय-साधारणम्। प्राणकृतेन अशनादिना सर्वेषां पुष्ट्यादिदर्शनात् इत्यर्थः) (प्राणं) प्राणमयात्मानं ब्रह्मोपासते ये "अहमस्मि प्राणः सर्वभूतानामात्मा (सर्वभूतात्मत्वं सूत्रात्मरूपेण बोध्यम्। तेन रूपेण प्राणमयकोशस्य इह उपास्यत्वात्।) (आ.गिरि - सूत्रात्मा। पूर्वस्य यः आत्मा चिद्धातुः एषः एव तस्य प्रणमयस्य आत्मा इति योजना।) (आयुष्ट्वम् उपास्यो गुण इति मत्वा आह - आयुरिति) आयुः (तस्य तद्गुणकत्वे हेतुः - जीवनहेतुत्वात् इति। तद्-हेतुत्वस्य श्रुत्यनुभवसिद्धत्वादित्यर्थः) जीवनहेतुत्वात्" इति, ते सर्वमेव आयुः अस्मिन् लोके यन्ति। न अपमृत्युना म्रियन्ते प्राक् प्राप्तात् आयुषः (वर्त्तमानदेहारम्भसमये यावदायुः सप्तत्यशीत्यादिलक्षणं विधिना कल्पितं तावदायुः प्राप्तायुःशब्दार्थः।) इत्यर्थः।[३५] शतं वर्षाणि इति तु युक्तं सर्वमायुरिति (पा.भ सर्वमायुरेति - छा.उ २.११.२, २.२०.२, ४.११.२, ४.१२.२, ४.१३.२) ("सर्वमेव त आयुः यन्ति" इत्यत्र सर्वशब्दसामर्थ्यात् शतं वर्षाणि यन्तीत्येव युक्तमित्यर्थः।) (परार्धसंख्यां विहाय शतमित्यत्र हेतुमाह - श्रुतिप्रसिद्धेः इति। शतायुषः पुरुषः इति श्रुतिप्रसिद्धेः इत्यर्थः।) श्रुतिप्रसिद्धेः[३६]। (आयुष्ट्वगुणक-उपासनया आयुरेव प्राप्तव्यमित्यत्र किं विनिगमकमिति पृच्छति - किं कारणमिति) किं कारणम्? (श्रुतिरुत्तरमित्याशयेनाह - प्राणो हीति।) प्राणो हि

---

[35] ननु आयुषप्राप्तेः प्रारब्धफलत्वेन कस्यापि प्राङ्मरणासंभवाद् इदमयुक्तम् इत्याशङ्क्य अर्थन्तरमाह - शतं वर्षाणीति। सर्वमायुः इत्यनेन शतं वर्षाणि इत्येव युक्तं ग्रहीतुम् इत्यर्थः।. तथा च उपासकः शतं वर्षाणि जीवति इति उपास्तिः स्तूयते इति भावः। (गोविन्दानन्द)

[36] उक्तेऽर्थे प्रमाणमाह - श्रुतिप्रसिद्धेः इति। "जिजीविषेच्छतं शमाः", "जीवेम शरदः शतम्" इत्यादिश्रुतिषु शतवर्षाणामेव पूर्णायुष्ट्वेन प्रसिद्धेः इत्यर्थः। तैत्तिरीयब्राह्मणे तृतीयकाण्डे "शतायुर्वै पुरुषः शतवीर्यः" इति श्रुतेः (or तै.सं १.५.७.६.)। (गोविन्दानन्द)

भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। (ननु अत्र किं नियामकं सूचितं भवति इत्यत आह - यो यद्गुणक्म् इति। "तं यथा यथा उपासते तदेव भवति" (शत.ब्रा १०.५.२.२०)इति न्यायेन आयुष्ट्व-गुणक-उपासनाद् आयुःप्राप्तिलक्षणं फलं युक्तमित्येवं विद्याफलप्राप्तौ हेतुसूचनार्थमिदं प्रणो हि इत्यादिपुनर्वचनम् इत्यर्थः।) यो यद्गुणकं ब्रह्मोपास्ते स तद्गुणभाग् भवतीति विद्याफलप्राप्तौ हेत्वर्थं पुनर्वचनम् प्राणो हीत्याति।

It has been said that the senses engage in activities following that of prana. How is it so. This is being explained. Because the prana constitutes the life of beings, as evidenced by another sruti text, "Life exists until such time as prana functions in the body", therefore, it is the life of all. Sarvayuh means the life of all. The word sarvayusham is the same as sarvayuh. Since it is well known in the world that death follows when the prana leaves, the latter, indeed, becomes well known as the life of all. Therefore, those who disidentify themselves form the body made of food, which is external, and which is exclusive to everyone and meditate on Prana that is internal and common to all, as Brahman in this manner as " I am Prana, the self of all beings, being the cause of their life, I am their life" attain the full span of life in this world, that is, they do not die an accidental death before fully living the ordained span of life. According the to the Vedic text that is well known, "He enjoys the full span of life", it is but proper to mean sarvayuh as one hundred years. What is the cause of attaining the full span of life? For, prana constitutes the life of all beings and therefore it is said to be the life of all. Whoever meditates whatever quality of Brahman, becomes the enjoyer of those qualities. As such the repetition of the sentences, "the prana constitutes..." is to show the logicality of the attainment of the result of meditation.

You don't require sruti for this. Still it is quoted. Not akasadi bhutas. But beings. Prana is indeed life. It is known to all of us. It is not revealed by Sastra. Your life is so long as prana stays in the body. Whether he thinks or not, is immaterial. Therefore, it is called sarvayusham. Therefore food was called sarvaushadham. It is all ayus of everybody. When prana is gone, death is certain.

That which is external that is seen, which is external to prana, others and we both can see. It is asadharana, peculiar. It refers to annamaya. That which is common to all. From the pulse can you find out it is Devadatta. No. But form the body, you can find out he is so and so. Body is peculiar. But prana is common. Suppose one pair of beings are available as totally identical. That is why finger print are taken as evidence. Otherwise, it cannot be accepted in court. Your body is custom made. It is specially made for you. Nobody else had it nor will have. No contemporary for you. One who meditates upon this Prana as Brahman. How? I am Prana, which is atma of all bodies - thus. He will get all ayus. It is not after death. It is contradictory if it is in other world. All ayus is complete lifespan. He does not die untimely. The life that is ordained by previous karmas. If somebody dies early, that is what is ordained. What is that life? It is 100 years maximum. Somebody may say, elsewhere they live for more. No. It is srutiprasiddhi. Sagunabrahma has infinite qualities. (So Never it can be understood totally). Out of those qualities, you take one aspect of that Brahman. Then you become the recipient of that guna. In the world also, it is like that. If you study law, all the time law, law.

law. Then you become lawyer. It is upasana. Similarly, Vedanta also. it is called Brhamabhyasa. In gaining the result for meditation, the reason is this - iti there is repetition of the statement that prana is ayuh iti.

(तस्यैष एष इति वाक्यमानन्दमयो ब्रह्म इति वदतां वृत्तिकाराणां मतेन व्याचष्टे - तस्य पूर्वस्य इति। अत एव आनन्दमयाधिकरणे वृत्तिकारमते स्थित्वा आनन्दमयपर्यायस्थं इदं वाक्यं तस्य, पूर्वस्य, इति पदयोः इत्थमेव व्यवहितान्वयप्रदर्शनेन व्याख्यातमाचार्यैः। विवक्षितार्थस्तु...) तस्य पूर्वस्य अन्नमयस्य एषः एव शरीरे अन्नमये भवः शारीरः आत्मा। कः? यः एष प्राणमयः।

मनोमयात्मा

मनोमयात्मावतरणिका

तस्माद्वा एतस्माद् इत्यादि उक्तार्थमन्यत्[३७] (मनोमयपदव्यतिरिक्तम् इत्यर्थः)। अन्योऽन्तरः[३८] आत्मा मनोमयः। मन इति सङ्कल्पविकल्पात्मकम् अन्तःकरणम्। तन्मयः मनोमयः। (मयटो विकारार्थत्वे दृष्टान्तः - यथेति) यथा अन्नमयः। सोऽयं प्राणमयस्य आभ्यन्तर आत्मा।

मनोमयस्य पुरुषविधत्वनिरूपणम्

तस्य यजुरेव शिरः। (यजुःशब्दस्य प्रसिद्धमर्थमाह - यजुरिति इत्यादिना) यजुरिति अनियताक्षरपादावसानो (अनियतैः अक्षरैः पादपूर्त्तिः यस्य तथा इत्यर्थः) मन्त्रविशेषः (मन्त्रपदात्पूर्वं य इति शेषः) (सच्चिदानन्द - ऋक्तु नियताक्षरपादवती साम च गीतिरूपमिति च द्रष्टव्यम्)। तज्जातीयवचनो[३९] यजुःशब्दः, तस्य शिरस्त्वम्। प्राधान्यात् (शरीराङ्गाणां मध्ये शिरस इव वेदानां मध्ये यजुषः प्राधान्यादित्यर्थः)। (Why not Rigveda?) प्राधान्यं च यागादौ [४०]संनिपत्योपकारकत्वात्। (तदेव विवृणोति - यजुषा हीति। शस्त्रात्मिका ऋक्, स्तोत्रात्मकं साम च स्तुतिद्वारा आरादुपकारकत्वाद् अप्रधानमिति भावः) यजुषा हि हविर्दीयते स्वाहाकारादिना (आदिना स्वधा, वषट् च गृह्येते)।

Of the body made of food, spoken of above, this indeed is the self. Which? This one constituted of prana. The remaining sentences, i..e, tasmat va.. is the same as explained before. There is another self that is internal, and made of mind. Mind is the inner instrument of the nature of alternative proposals. That which is predominantly this mind is manomaya as is the case with annamaya. It is the internal self of the pranamaya. Yajus is its head. By yajus is meant those mantras, the number of letters, the feet and the length of the lines of which do not conform to any definite rules. The word yajus is expressive of the prose sentences of that type. The status of being the

---

[37] व्याख्यास्यमानाद् इतरत्। (गोविन्दानन्द)

[38] ज्ञानलक्षणस्य क्रियालक्षणाद् अन्तरत्वम्। क्रियायाः मानसज्ञानविषयत्वमस्ति। व्यापकं ज्ञानम्। व्याप्य is क्रिया।

[39] Because it is in singular, it refers to tajjatiya.

[40] Indeclinable. Meaning: Immediately, directly

head is due to its importance, and the importance consists in its being directly useful as a means in a fire ritual etc for an oblation is poured accompanied by an utterance of yajur mantra along with svaha etc.

That which obtains in the body made of food. It is sarira atma. Who? Pranamaya. This is said to point of anyontara atma. Body becomes atmavan because of this pranamaya. Tasmat etc already explained. What is manomaya? It is karanatmakam. Vijnanamaya is kartratmakam. Anandamaya is bhoktratmakam That is viveka. Manomaya is karana. It is instrumental in bringing all objects in the form of virttis through perception. They are recognised/identified by vijnana atma, karta. Karma is object of vritti, which is outside. The vritti takes place in the mind. It is called karana. Vijnana is karta. This mind is seat of emotions. Sankalpa is opposite thoughts. Antahkarana modification is mind. All classifications included here. Memory, knowledge etc are included here. Vijnana is only karta. It is atma of pranamaya. So pranamaya has become mithya.

This head etc are kalpana given by sruti. Head is yajur mantras. How is this possible? Earlier, they were all obtaining within the respective body. Here, mantras are not part of mind. Which vritti can be head? Anger is head. Sorrow is body. Pain is puccham. Since we are doing Brahman upasana, so HG being jnanasaktimat Brahman, Mind also expression of jnana sakti. So it is meditated upon in the form of Vedas. Yajur is one Veda which is very much used in rituals. Why not Rg Veda is head?. In antiquity, Rg Veda is ancient. No. In yaga, dravya, devata are constituents of Veda. They are yajnasvarupam. To perform a ritual, you require to invoke the devata. For this you have to chant mantra before offering the oblation. So it is head.

What is yajur mantras. They do not have rules of prosody. Avasana is end. So many syllables and feet are there in prosody. Like the modern poetry. Write a paragraph and type it vertically. ... avasanani yasya mantrasya. Mantras of this nature is yajur. Why it is pradhanyam? It is due to its usefulness. One is sannipatya upakarakatvam. Other is arat upakaraktvam. sannipatya is direct usefulness. You have to chant yajur only, for offering oblation. Without ahuti, there is no yaga. You chant Rig only for praising the devatas. Adi is for vashat etc. Agnaye idam, na mama. They say it became namah without any grammar knowledge. Arat is indirectly. Adhvaryu is Yajurvedi, Hotru is Rgvedi. Udgatr is Samavedi. All are required. Apurva utpattaye you require all the three Vedas. Otherwise it will produce only ashes.

Suppose you don't chant Rg Veda will there be apurva? No. Then how can you call Yajur is predominant. Bhagavan says I am samaveda among the Vedas. So one may say it is important. Sama is not musical. It has only four notes. You require five notes for music. It has some musical shade. For Max Muller it is Rg Veda. So why do you say prominence. I agree with you. But this is what sruti says.

(ननु देवतोद्देशेन द्रव्यत्यागात्मकस्य यागस्य स्वरूपोत्पत्तिः मन्त्रं विनापि संभवत्येव, परं तु अपूर्वीयस्य तस्य तेन विना उत्पत्तिः न संभवति। तथा च विवक्षितविवेकेन यजुषोऽपि ऋक्सामयोरिव अदृष्टार्थत्वपर्यवसानाद् यजुषः प्राधान्यमसिद्धम्, प्रत्युत वेदानां सामवेदोऽस्मि इति भगवता उक्तत्वात् तस्यैव प्राधान्यं युक्तम् इति अस्वरसात् पूर्वोक्तां वस्तुगतिं स्मारयति - वाचनिकी वा इति) वाचनिकी[41] वा शिरआदि-कल्पना सर्वत्र।

यजुरादीनां मानसत्व-उपपादनम्

(ननु यजुःशब्दस्य शब्दराशिविशेषे प्रसिद्धत्वात् तस्य च शब्दराशिविशेषस्य मनोमयकोशं प्रति अवयवत्वाभावात् कथं प्रसिद्धयजुषि शिरस्त्वकल्पनम्, पूर्वोत्तरपर्यायेषु प्रायेण कोशावयवेष्वेव शिरस्त्वादिकल्पनादर्शनात् इत्याशङ्क्य, तर्हि यजुरादौ मनोमयं प्रति शिरआदिदृष्टिविधिबलादेव वेदानां मनोवृत्तिविशेषरूपत्वेन तदवयवत्वं कल्प्यते, प्रमाणभूतायाः श्रुतेः अनतिशङ्कनीयत्वाद् इत्याशयेनाह - मनसो हि इति। हि-शब्दः प्रसिद्धिद्योतनार्थः, अवधारणार्थो वा। तथा च मनसोऽवयवत्वेन प्रसिद्धा वृत्तिरेव यजुरित्युच्यते इति संबन्धः) (आनन्दगिरि - यजुःशब्देन बाह्यो यजुर्वेद उच्यते। तस्य कथम् आन्तरं मनोमयं प्रति शिरस्त्वम् इत्याशङ्क्य आह - मनसो हीति) मनसो हि (तमेव वृत्तिं विशिनष्टि - स्थानेत्यादिना।) स्थान[कण्ठादि]-प्रयत्न[बाह्य आभ्यन्तरश्च]-नाद[ध्वनिः]-स्वर[उदात्तादयः]-वर्ण[अकारादयः]-पद-[ते एव अनुपूर्वी गताः पदविशेषाः]-वाक्य[पदसंहतिश्च वाक्यम्]-विषया [इत्येतत्विषया यथोपवर्णित-रूप-भावना-अनुरञ्जिता] (ताल्वादिस्थानेषु वाय्वभिघातानुकूलेन प्रयत्नेन जनितो यो नादो ध्वनिः, तद्व्यङ्ग्या ये उद्‌त्तादिस्वरयुक्ताः वर्णाः ते च पदानि च वाक्यानि च विषया यस्यां वृत्तौ सा तथोक्ता) तत्संकल्पनात्मिका [एतदधीमहे इति सङ्कल्पात्मिका वृत्तिः] (तेषु वर्णपदवाक्येषु पूर्वोक्त-अनियताक्षरपादावसानत्वसङ्कल्परूपा इत्यर्थः) तद्भाविता वृत्तिः (यजुर्वेदोऽयमित्याकारोपेता इत्यर्थः) श्रोत्रकरणद्वारा (श्रोत्राख्यं करणं द्वारं यस्याः सा ततोक्ता) (प्रथमं शब्दराशिविशेषे गृहीतोऽपि संकेतःपश्चात् तद्विषयकवृत्तिविशेषविषयतया कल्प्यते, यथा प्रथमं चक्षुरादिशब्दानां गोलकेषु गृहीतः अपि संकेतः तदरिक्तचक्षुरादि-इन्द्रियविषयतया पश्चात् कल्प्यते तद्वद् इत्याशयेन आह - यजुःसंकेतविशिष्टा इति) यजुःसंकेतविशिष्टा यजुरित्युच्यत[42] [...वृत्तिः वाक्करणद्वारा बहीरूपं गता श्रोत्रद्वारा च गृहीता यजुरित्युच्यते तत्सङ्केतविशिष्टा] (आनन्दगिरि - यद्यपि यजुःशब्दो बाह्ये शब्दराशौ रूढः तथापि श्रुतेः अनतिशङ्कनीयत्वात्, तत्प्रामाण्यात्, विशिष्टमनोवृत्तिः यजुःसंकेतविषयभूता "यजुर्वेदमधीमहे एतत्क्रमकाः वर्णाः यजुर्वेदतया अध्येतव्याः" इत्येवं सङ्कल्परूपा ग्राह्या इत्यर्थः)। एवं ऋक्। (यजुष इव ऋगादेरपि तुल्यन्यायतया मनोवृत्तिविशेषरूपत्वमाह - एवमिति। ऋक्सामग्रहणमथर्ववेदस्यापि उपलक्षणम्।) एवं साम।

यजुरादीनां मानसज्ञानत्व-अङ्गीकारेण प्रयोजनम्

(श्रुत्यनुग्राहिकां युक्तिमाह - एवं च इति) एवं च (एवं शब्दार्थमेवाह - मनोवृत्तित्वे मन्त्राणाम् इति) मनोवृत्तित्वे मन्त्राणाम्, (सच्चिदानन्द - एवं यजुरादीनां मानसरूपत्वे एव मनोविषयत्वं घटते, तथात्वे एव च मन्त्रावृत्तिः तत्र तत्र

---

[41] वचनेन निर्वृत्तं वाचनिकम्। वचन + ठक् + ङीप् (टिड्ढाणञ् सूत्र)

[42] Vritti is yajus means not any vritti is yujas but varnas assembled in particular sequence.

चोद्यमाना सविषयत्वं लभते तथा च मानसो जप उपपद्यते।) वृत्तिरेव आवर्त्यते इति मानसो जप उपपद्यते। अन्यथा (तेषां मानसक्रियारूपत्व-अनुपगमे इत्यर्थः) (आनन्दगिरि - शब्दानां घटादिवद् बाह्यद्रव्यत्वे मनोविषयत्व-असंभवात् [मनोव्यापारात्मकत्व-अभावे तेन कर्त्तुम् अशक्यत्वात् इति यावत्] मनसो बाह्ये अर्थे अस्वातन्त्र्यात् मानसो जपो न स्याद् इत्यर्थः) (सच्चिदानन्द - अन्यथा शब्दमात्ररूपस्य मन्त्रस्य मनोविषयत्वं न घटते। घटादिवत् बाह्ये तस्मिन् मनसः स्वातन्त्र्याभावात् इति बहुशष्ठोद्यमानो मानसो जपो नोपपद्यते) (मन्त्रो नावर्त्तयितुं शक्य इत्यत्र हेतुः - अविषयत्वात् इति। आवृत्तिविषयत्व-अदर्शनात् इत्यर्थः) अविषयत्वात् मन्त्रो न आवर्त्तयितुं शक्यः घटादिवत् इति मानसो जपो नोपपद्यते[४३]। (मास्तु मन्त्रावृत्तिरिति वदन्तं प्रति आह - मन्त्रावृत्तिष्ठोद्यते इति) (आनन्दगिरि - इतष्ठ मनोवृत्तित्वं मन्त्राणां वाच्यमित्याह - मन्त्रावृत्तिः च इति) मन्त्रावृत्तिष्ठोद्यते बहुशः कर्मसु।

Or the interpretation of the head etc in all contexts is based on the authority of the Sruti. Yajuh is a constituent of manomaya since that aspect of the mind is called yajus which consists in thinking of particular syllables, words and sentences - as uttered by particular organs (of utterance of the letters), with particular effort (for utterance), pitch and accent or modulation of voice (high, low etc), as constituting the Yajur Veda and is recognised as such; and it is this thought that manifests itself through hearing and other organs and is given the appellation of Yajus. Thus are to understood the Rg mantras as well as the sama mantras. Thus when the mantras assume the nature of thoughts, their mental utterance becomes possible. Otherwise, mental repetition of a mantra would not become possible, in as much as the mantra, like a pot, would then be external to the mind. But the mental repetition of the mantra is to be done, for it is laid down in various manner in association with rites.

By word alone, this imagination - yajus is the head. One of the Vedas it has to say, Yajus. Anything you say, the other two are going to fight. So it is purely by vacana. Everywhere it is so. Look upon Yajus as head of manomaya. Further, Yajus when we say, what do we mean? Is it an object in the world like pot? For the word Yajus, is there an object outside? It is not. We get it from a buddhi only. It is vrittirupa only. It is in the form of vritti alone. Vritti alone comes out. It is in the mind of teacher. From that head it is passed to another head through ear. For that to get transferred, ear is dvara. It is therefore called karna parampara. How does it remain? It remains in the form of vritti. Vritti that has become upadhi for atma. Buddhi undergoes samskara to gain yajurveda in the form of vritti. So no outside object. So Veda means vritti. It is not in the book. It is in the form of ideas only that is transferred from one mind to another mind.

How to you get this? Through sound. How a sound is manifest. There is svaras coupled with varna. How they come out. Prana also required. Prayatna is there. It is anukula prayatna. The air that strikes different parts of the mouth. Air is to be blown out. Varna exists in the neck. Varna has to pushed out with svaras. That is prayatna. So places are involved in the pronunciation. For pronunciation of cakara etc you have talu, palate for that purpose. Two palates, one throat, teeth and tongue. Dental letters require base of teeth, not necessarily teeth.

[43] You cannot repeat svaras by seeing.

Then there is nada, sound converted in the form of varnas. Anunasika etc was pronounced before for nada. All these together constitute what we call the expressed words of the vrittis inside. Through the ears you receive and again it becomes vrittis. Vrittis are cetana atma alone. It is very beautiful manomaya. Yajus etc consist of all knowledge. Knowledge of things beyond our perception. That is why it is called Hiranyagarbha who is jnanatmaka, who is meditated upon as manomaya, in the form of yajus etc. Vedas do not have an object outside which senses can see.

Vritti is yajus means what. Any vritti is not yajus. If you think of monkey, it is not yajus. So what is yajur vritti. As it was pointed out, it is varnas assembled in particular sequence etc. Sabda has two forms. One is within and what is manifest outside. What is outside is vaikhari. Inside it is in the form of para, pasyanti, madhyama etc. So that we can repeat mentally. So manasa japa is possible. There is therefore an inner aspect of sound that is manifest outside. Vaikhari sound has the characters described here. They are sthana etc. Varna with the above lakshana of sthana etc form words. Word form sentences, when syntactically connected. Sentences form vishaya, subject matter of a given vritti. In which vritti Yajur vishaya is there, that is indicated here. That is due to sankalpa. When it has the characteristic of Yajurveda described as before as aniyata akshara etc. It is also recognised (bhavita) as yajurvritti, because it qualifies for it. Svaras you cannot repeat by seeing them. It is always through ears. Ears are the gates through which yajur veda enters into your head and assumes the form of vritti, becomes manomaya. You can repeat mentally because it is in the form of vritti. Avritti is repetition which is always an action. To repeat mentally, first you have to repeat orally so that you can get them corrected. Sanketa is name. Whole yajur veda is taken as singular, as vritti. Vritti-visesha to lakshana-bheda is cause for different names.

Thus, mantras being in the form of vritti, so japa is possible. Because vritti alone is repeated. If it is external, I don't have freedom to repeat. Because it is vritti, independent of object outside, it can be repeated. If it depends on object outside, it is vishaya-tantra. Avritti is not possible. Because it is in the form of vritti, repetition is possible. You cannot repeat the pot. Avishayatvat, meaning it is not subject matter or object for repetition. If you repeat word pot, again it is vritti only. Object outside cannot be repeated. Let there not be mental repetition. But Vedas tell about repetition in many places in karmas. So we have to accept vritti-atmaka jajur mantras.

(मन्त्राणां घटादिवद् बाह्यद्रव्यत्वे तेषामावृत्तिः नोपपद्यते, लोके क्रियया एव आवर्त्यत्वदर्षनात्. अत आवृत्तिविध्यनुपपत्त्या मन्त्राणां क्रियात्वं वाच्यम् इत्युक्तम्। तत्र अन्यथापि उपपत्तिं शङ्कते - अक्षरविषयेति।) अक्षरविषयस्मृत्यावृत्त्या मन्त्रावृत्तिः स्यात् इति चेत्। (अन्यथा-उपपत्तिं दूषयति - नेति) न। मुख्यार्थ-असम्भवात्। (ननु कोऽसौ मुख्यार्थः, कथं वा तदसंभवप्रसङ्गः इत्याकाङ्क्षायामाह - त्रिः प्रथममित्यादिना) (मन्त्रेभ्यः स्मृतेः अन्यत्वात् अन्यावृत्तिः गौणी प्रसज्यते। अतः न अन्यथापि उपपत्तिः इत्युक्तमेतत् स्फुटयति - त्रिः प्रथममित्यादिना) "त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्" (तै.सं २.५.७ ऐ.भा ३.३.१३) इति ऋगावृत्तिः श्रूयते (आनन्दगिरि - सामिधेन्यः

[अग्निसमिन्धनसाधनीभूताः इत्यर्थः] समिधः यदा अध्वर्युणा हूयन्ते तदा प्र वो वाजा अभिद्यवः इत्याद्यष्टादशर्चं सूक्तं होता शंसति, तासां च ऋचां मध्ये प्रथमां ऋचं सूक्तस्य अन्त्यां च ऋचं होता त्रिरनुब्रूयाद् इत्यावृत्तिः श्रूयते इत्यर्थः।)। तत्र (आवृत्तौ इत्यर्थः) ऋचोऽविषयत्वे (अविषयत्वे इति च्छेदः) तद्विषयस्मृत्यावृत्तौ च क्रियमाणायां "त्रिः प्रथमामन्वाह" इति ऋगावृत्तिः मुख्यः अर्थः चोदितः परित्यक्तः स्यात् (ननु एवं स्वाध्यायोऽध्येतव्यः इत्यादौ वाचनिके जपे च मन्त्राणां उच्चारणं तदावृत्तिश्च अवगम्यते, तेषां मनोवृत्तित्वपक्षे कथमुच्चारणकर्मत्वं संभवति। तथा च अध्ययनविध्यादेः मुख्यार्थपरित्यागप्रसङ्गः इत चेत्, न। मानसजपविध्यनुसारेण मनोवृत्तिरूपवेदानां अध्ययनादेः बाह्यशब्दद्वारकतया गौणत्वोपपत्तेः । न चात्र विनिगमनविरहः इति वाच्यम्। मानसजपस्य फलाधिक्यश्रवणेन तस्यैव मुख्यतायाः न्याय्यत्वात्। अनेनैवाशयेन मानसो जपो नोपपद्यते इत प्रागुक्तम्। वार्त्तिकेऽप्येतत् दर्शितम् - भूयोऽपीयःफलत्वं च बाह्यमानसयोर्जपे। अतो मानसमुख्यत्वम् इतरस्यास्तु गौणता।। इति।)। (ननु अस्मिन् पक्षे कथं वेदानां नित्यत्वनिर्वाहः वृत्तेः क्षणिकत्वाद् इत्याशङ्कां परिहरन् उपसंहरति - तस्मादिति) (आनन्दगिरि - मन्त्राणां मनोवृत्तित्वम् उक्त्वा मनोवृत्तीनां चिद्व्याप्तत्वेन एव सिद्धेः चिदात्मतामाह - तस्मादिति) तस्माद् मनोवृत्त्युपाधिपरिच्छिन्नं आत्मविज्ञानं मन्त्राः (वृत्तिविशेषानुगतं चैतन्यमेव वेदाः इत्यर्थः।) इति।

(सच्चिदानन्द - न च तत्तदक्षरविषयस्मृत्यावृत्त्या एव मन्त्रावृत्तिविधिः चरितार्थो भविष्यति इति वाच्यम्। मन्त्रावृत्तेः चोदितायाः परित्यागेन तत्स्मृतिमात्रस्य आवर्त्तने मन्त्रशब्दस्य गौणार्थता एव स्वीकृता स्यात्। "त्रिः प्रथमाम्" इति ऋगावृत्तिर्हि श्रूयते, न तु ऋक्स्मृत्यावृत्तिः। गौणमुख्ययोः च मुख्ये संप्रत्ययः युक्तः असति बाधके। सोमक्रयादूर्ध्वं प्राचीनवंशं प्रति नीयमाने सोमे पठितव्या अष्टौ ऋचः विधाय, "तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम्। ता द्वादश संपद्यन्ते" इति ऋगावृत्तिर्विहिता। तत्र आद्यन्तयोः ऋचः स्मृतिरेव आवर्त्यते न ऋचौ इति कथमवशिष्टाभिः सह आवर्त्तिते स्मृती अपि द्वादशसङ्ख्यापूरणसमर्थे स्याताम्? समानस्वभावानां हि सङ्ख्यापूरकत्वमिष्यते। तथा च अत्र विध्यपेक्षित द्वादशसङ्ख्यासंतत्यभावे "त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तष्टसौ नह्यति स्थेम्ने" (ऐ.आ ३.३.१३) इत्युक्तं यज्ञस्थेमफलमपि न भवेत् विहितहान-अविहितकरणाभ्यां श्रुत्यर्थअनुष्ठान-अभाव-प्रसङ्गाद् इत्यभिप्रायः। तस्मादेतद्-दोषपरिजिहीर्षुणा मनोवृत्तिरूपा एव यजुरादयः स्वीकार्या इति भावः।

किञ्च एवं मनोवृत्तिरूपत्वं यजुरादीनां न केवलम् उत्पन्नप्रध्वंसि-मनाविकारमात्रत्वम् अङ्गीकर्त्तव्यम्, किन्तु तत्तदर्थप्रकाशकत्वेन वेदशब्दस्य अन्वर्थत्वसिद्ध्यर्थं तत्तद्वृत्त्युपहित-आत्मचैतन्यव्याप्तत्वं तदाभासत्वं च इष्टव्यम्। स च अर्थप्रकाशः मूलतः तत्तद्वृत्ति-निष्ठस्य आत्मचैतन्यस्य एव इति स्थिते यजुरादीनां परमार्थतः उत्पत्तिविनाशरहितचैतन्यस्वरूपत्वमपि सिध्यति। एवं च वेदनित्यत्व-उपपत्तिः अपि सेत्स्यति इत्याह - तस्मान्मनोवृत्तीति। न च लौकिकवाक्यानामपि एतेन न्यायेन चैतन्य-अभिन्नत्वाद् नित्यता स्याद् इत्यतिशङ्कनीयम्। परमार्थदृष्ट्या सर्वस्याः अपि वाचः चैतन्यरूपेण नित्यत्वे अपि वेदानां सर्वस्यापि जगत इव स्वात्मनोऽपि चैतन्याभेदप्रकाशनाय एव प्रवृत्तत्वरूप-विशेषसद्भावात् लौकिकवाक्यवत् केनापि अतत्वज्ञेन पुरुषेण प्रयत्नपूर्वकं व्यावहारिकवस्तु-विशेष-प्रकाशनाय क्वचित्कालविशेषे निर्मितत्व-अभावात् च तत्साम्यानुपपत्तेः इति मन्तव्यम्।)

Objection: The mental repetition of a mantra may be effected by way of repeating the memory of syllables (of the mantra)..

Answer: No, because it would involve a departure from the primary sense of words. To explain, the Vedic statement "let him thrice repeat the first (mantra) and thrice the last" enjoins a repetition of certain mantras. If the mantra cannot itself be the subject of

repetition - if on the other hand, the mere thought of it were repeated, - it would be tantamount to a neglect of what is primarily enjoined in the words," let him thrice repeat the first mantra"

Therefore, the mantras are nothing other than the atman's consciousness limited by the uapdhi of the states of the mind and manifested in these states of mind.

(यया वृत्त्या बाह्यो वेदः विषयीक्रियते तद्वृत्त्यनुगतचैतन्येनापि स विषयीक्रियते इति प्रसिद्धवेदविषयकं चैतन्यमेव मुख्यवेदः, चैतन्यस्य तदुपाधिभूतवृत्तेश्च कल्पिततादात्म्यसत्त्वाद् वेदानां सृष्टिप्रलयादिश्रवणं पूर्वोक्तावृत्त्यादिकं सर्वं चैतन्यस्य एव भवति इति न पूर्वग्रन्थ-विरोधोऽपि इति भावः। येनाभिप्रायेण वेदानां चैतन्यरूपत्वम् उपसंहारावसरे दर्शितं तमेवाभिप्रायं प्रपञ्चयति - एवं चेति) (आनन्दगिरि - मन्त्राणां मनोवृत्तित्वेन आवृत्तिर्घटते इत्युक्तम्। परम्परया चिदात्मत्वेन नित्यत्वमपि घटते इत्याह - एवं च इति) एवं च (चैतन्यरूपत्वे सति इत्यर्थः। वेदानां चैतन्यरूपत्वाविशेषे अपि उपाधिभूतवृत्तिभेदाद् यजुरादिभेदः इत्यादिकमूह्यम्।) नित्यत्वोपपत्तिः वेदानाम्। अन्यथा (आनन्दगिरि - स्वप्रकाशचिदात्मत्व-अनङ्गीकारे रूपादिवद् विषयत्वात् अनित्यत्वमपि प्रसज्येत। कालिदासादिवाक्यानामपि एतेन न्यायेन नित्यत्व-आपाताद् युक्त्याभासमेतत्।) (अन्यथा मनोवृत्तिमात्रत्वे शब्दमात्रत्वे वा वेदानां विषयत्वशब्दितं जडत्वं प्रसज्येत, सति च विषयत्वे रूपादिवदनित्यत्वं भवेदित्यर्थः) विषयत्वे रूपादिवद् अनित्यत्वं च स्यात् ("अतोऽन्यदार्तम्" इत्यादिश्रुत्या चैतन्यातिरिक्तस्य सर्वस्य विनाशित्व-अवगमात् इति युक्तिसूचनार्थः चकारः)। (तत्र इष्टापत्तिं वारयति - नैतद्युक्तम् इति) (आनन्दगिरि - अस्त्वनित्यत्वमिति न वाच्यमित्याह - नैतद्युक्तम्) नैतद्युक्तम् (एतद्वेद-अनित्यत्वं न युक्तम्, वाचा[४४] विरूप नित्यया, अनादिनिधना नित्या, इत्यादिश्रुतिस्मृतिविरोधप्रसङ्गाद् इत्यर्थः) (आनन्दगिरि - वेदानां[४५] जडत्वे स्वप्रकाशेन आत्मना एकत्वं न संभवति जडाजडयोर्विरोधात् अतो मनोवृत्तिव्यापकचिदात्मत्वं सूचितमित्यर्थः)। (वेदानां चैतन्यरूपत्वे श्रुत्यन्तरम् अनुकूलयति - सर्वे वेदाः इति) "सर्वे वेदाः यत्र (चिदेकरसे आत्मनि) एकं भवन्ति (एकतां गच्छन्ति) स मानसीनः (मनसि साक्षितया वर्त्तमानः) (आनन्दगिरि - साक्षितया मनसि भवो मानसीनः) आत्मा जनानाम् (सर्वेषां जनानाम् आत्मा वास्तवस्वरूपमित्यर्थः)" (तै.आ ३.११.१) इति श्रुतिः नित्यात्मना एकत्वं ब्रुवती, ऋगादीनां नित्यत्वे, (ऋगादीनां कार्यत्वेन अनित्यत्वे अपि कार्यकारणयोः तादाम्याद् एकं भवन्तीति वचनं कथंचिदुपपद्यते, तेषां नित्यत्वेन स्वरूपैक्ये तु जीवब्रह्मणोः इव एकत्ववचनं मुख्यार्थमेव भवति इत्याशयेन आह - समञ्जसा इति) समञ्जसा स्यात्। "ऋचः [विधिनिषेधरूपाः] अक्षरे (नाशरहिते) परमे (सर्वकारणत्वात् परमे) व्योमन् (विभुत्वादिभिः व्योमसदृशे) यस्मिन् (ब्रह्मणि) देवाः (ब्रह्मादयः) अधि विश्वे (सर्वे) निषेदुः (अधिनिषेदुः उपरिभावेन स्थिताः सर्वसंसार-अस्पृष्टे ब्रह्मणि स्वरूपत्वेन स्थिताः इति यावत्। तथैव ऋचः वेदाः तस्मिन् स्थिताः इति मन्त्रार्थः)"

---

[44] तथा च वाचनिकं वेदानां नित्यत्वं, न कालिदासादिवाक्यानाम् इति भावः। वाचनिकमिति युक्तिस्तु तत्संभावना-मात्रमिति भावः। (गोविन्दानन्द)

[45] ननु वाचनिकं नित्यत्वं द्रव्यत्वे अपि अविरुद्धम् इत्याशङ्क्य आह - वेदानामित्यादि। वचनस्य आकारकत्वात् उपपद्यमानमात्रार्थबोधकत्वात् न तष्टलाद् असंभवदर्थः शक्यः अभ्युपगन्तुमिति भावः। (गोविन्दानन्द)

(ऋ. २.३.२५. श्वे ४.८) इति च मन्त्रवर्णः (आनन्दगिरि - अक्षरे परमे व्योमकल्पे ब्रह्मणि ऋचः विधिनिषेधरूपाः निषेदुः तादात्म्येन व्यवस्थिताः इति च मन्त्रवर्णः एकत्वं दर्शयति इत्यर्थः)।

> Thus the stand that the Vedas are eternal becomes tenable. Otherwise, on their being an object like colour, they will become impermanent. And that is not acceptable. And the Vedic statement, "Where all the Vedas become one reality that is atma which is obtaining in the mind as the witness. which talks of the identity of Rkmantras etc with the eternal Self will become justifiable, if only the mantras are eternal. And there is again a mantra saying that the Rks exist in the indestructible and highest being that is all pervasive like space in whom all gods reside.

To repeat the mere idea of what is taught in the mantra is to resort to a secondary sense of the injunction. For, the idea of what is taught in the mantra is different from the mantra itself, of which a repetition here is enjoined.

Now, suppose I have seen an object like pot and I know what a pot is. It is in my memory. By the repetition of smriti, I can fulfil the command of repetition. But the problem is, if you repeat the smriti, it is not repetition. Karta of the chanter has to make a sankalpa that I am going to do repetition and smriti is not considered avritti. You may be repeating the smriti, you may remember something else also because there is no sankalpa. So repetition we say is an anga of karma preceded by sankalpa. To accomplish the ritual we have to do the mental repetition with purpose. Then only the vidhi is followed. You perform this - vidhi says. Then you have to do it with deliberation.

What do you want to convey here. From the memory you want to do avritti? Or why should I do the sankalpa? iti. Without sankalpa there is no avritti. You cannot wait for the smriti to do this thought process. Mukhyartha is vidhi. When mantra is to be repeated so many times - when it is said, then it can be fulfilled only by doing sankalpa. You can repeat with the help of smriti or looking at the book. Yajurvedi is going to offer the oblation for which there are 11 riks are there in a particular section. First one is to be repeated thrice and the last one also thrice. It is to be repeated by hota mentally. This is vidhi. In this repetition, if avritti vishayatvam is not there, if it is not an object to be repeated, it becomes only an object of memory and not a kriya vishaya, (kriya vishaya means karta is there), it is not fulfilling vidhi of repeating the mantra thrice. It is the main meaning. Mantra repetition is the anga of ritual and is going to produce result. And that is possible only when the mantra is in the form of vritti, not depending on external object.

How are you going to maintain the eternality of Vedas in your paksha? Vedas we say are perennially eternal. In every creation, it is manifest. If Vedas are in the form of vritti, vedanam anityatvam. It is momentary. How can it be real. This doubt is removed by saving tasmat. Do you know what is Veda? They are nothing but caitanya - vritti-avacchinna caitanyam. That Brahman alone is of the form of vritti here. One special vritti is Yajur Veda. It becomes upadhi for atma. Remaining asanga, it has upadhi. So the vritti of mind as pervaded by caitnaya alone is mantras. Everything is caitanya atma alone. Here it is cetana

atmanah upadhi. Both pot and pot vritti are anitya. Veda vrittis are upadhi for nitya atma (whether manifest or unmanifest) unlike pot vritti.

Vedas remain in unmanifest form before creation along with sat as the upadhi of sadatma. In this manner alone, i.e., mantras being the upadhi of caitanya atma, they become nitya. suppose it is purely manovritti, without taking caitanya into account or it is purely sound external, then it will become impermanent. Pot and pot vritti both are jada. Here also vritti is jada. But it is upadhi of atma and therefore it repeats itself in every cycle of creation. Sruti that talks of oneness for all mantras with nitya self which obtains in the mind as Sakshi. This sruti becomes meaningful or proper or make sense only when the mantras have nityatvam. Again there is another sruti which says: in that nitya pervasive atma alone in which all devas reside, all mantras also exist. So Vedas exist in paramsevara alone. Because it is jnanasvarupa. In all knowing Isvara Vedas exist. So isvara being nitya, Vedas also nitya.

मनोमयस्य वेदात्मतोपसंहारः

आदेशः [सच्चिदानन्द - आदिशति विधत्ते अनुष्ठातव्यम् इत्यादेशः ब्राह्मणम्। तच्च यजुरादीनाम् आत्मा यथा जीवात्मा स्वाङ्गानाम्, विध्यर्थत्वात् तेषाम्] अत्र ब्राह्मणम्, अतिदेष्टव्यविशेषान् अतिदिशति (अतिदेष्टव्यविशेषान् कर्त्तव्यविशेषान् इदमेवं कर्त्तव्यम् इति अतिदिशति इत्यर्थः) इति (आत्मा)। [अथर्वाङ्गिरस इत्येतद् व्याचष्टे - अथर्वणेत्यादिना] अथर्वणा अङ्गिरसा च दृष्टाः मन्त्राः ब्राह्मणं च [ताभ्यां दृष्टम् इत्यनुषङ्गः] (ननु ब्राह्मणं च इति ब्राह्मणस्यापि प्रतिष्ठात्वेन ग्रहणं न युक्तम् आदेशपदेन ब्राह्मणस्य आत्मत्वेन समर्पितत्वाद् इत्याशङ्क्य अत्र ब्राह्मणपदं तद्विशेषपरम् अतो नोक्तदोषः इत्याशयेन ब्राह्मणमपि विशिनष्टि - शान्तीत्यादिना) शान्तिकपौष्टिकादि-प्रतिष्ठाहेतुकर्मप्रधानाः (प्रधाना इति पुल्लिङ्गनिर्देशो मन्त्रपदाभिप्रायः, तदिति निर्देशः पुच्छपदाभिप्रायः इति विभागः) [सच्चिदानन्द - इष्टप्राप्त्यनिष्टपरिहाराभ्याम् ऐहिकप्रतिष्ठाहेतुकर्मप्रधानत्वात् वेदात्मनः पुच्छम् प्रतिष्ठा। ऐहिकप्रतिष्ठारहितस्य हि न अप्रतिबन्धेन पारलौकिके कर्मणि परमपुरुषार्थदायिनि ज्ञानसाधने वा प्रयत्नः स्थिरो भवेद् इति कृत्वा अथर्वाङ्गिरसःपुच्छं प्रतिष्ठा इत्युक्तमिति ध्येयम्।] तत् पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति मनोमयात्मकप्रकाशकः (मनोमयावयवयजुरादिप्रकाशकः इत्यर्थः) पूर्ववत् ।३।

> Adesa here means the section of the Brahmana, for the Brahmana section of the Vedas gives instructions about one's particular duties. The mantra and brahmana section seen by the sages Atharva and Angiras are the tail that supports, for they are important as rituals that are means for the gain of peace and prosperity etc that constitute the support. With regard to this, there is Rkmantra revealing the atma consisting of manomaya.

Adesa means brahmana section which contains teachings of duties. In this manner this karma is to be done iti they give instructions. All Vedas require this body which contains the manual of rituals. It is like atma. The tail is Atharva veda mantras and brahmanas. They (Atharva and Angirasa) are mantra drshtarah. They are include mantras and rituals for neutralising papas (prayscitta) and also accomplish small and big ends that are material. They are pratishtha

hetu. You must get rid of papas and get nourishment also. So it is pratishtha for life. Pradhana, primarily these are the rituals. Other karmas also there.

ANUVAKA 4

यतो वाचो निवर्त्तन्ते । अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ।।४ ।।

यतः - (the total mind is that Hiranyagarbha) from whom; वाचः - words; निवर्त्तन्ते - return; अप्राप्य - without reaching; मनसा सह - along with the mind; आनन्दम् ब्रह्मणः - the happy nature of Hiranyagarbha; विद्वान् - one who meditates on; न बिभेति - does not fear; कदाचन - at any time; इति - thus; तस्य - of that; एषः - this manomaya; एव - is indeed; शारीरः आत्मा - the inner self; यः पूर्वस्य - of the previous one (i.e., pranamaya); तस्माद् एतस्माद् मनोमयात् - than that manomaya; अन्यः - other; अन्तरः - interior; आत्मा - self; विज्ञानमयः - vijnanamaya is; तेन - by that vijnanamaya; एषः पूर्णः - this manomaya is filled; सः वै एषः - that vijnanamaya indeed (also); पुरुषविधः एव - is of the human form only; तस्य - of that manomaya; पुरुषविधताम् - the human form; अनु - in keeping with; अयं पुरुषविधः - this vijnanamaya is of human form; तस्य - of that vijnanamaya; श्रद्धा एव - faith alone; शिरः - head; ऋतम् - right understanding; दक्षिणः - the right; पक्षः - side; सत्यम् - truth; उत्तरः - the left; पक्षः - side; योगः - tranquility; आत्मा - the trunk; महः - mahah; पुच्छम् - the tail (as it were); प्रतिष्ठा - which is the supporter; तद् अपि - in this regard also; एषः श्लोकः - the following Rgmantra; भवति - there is

The total mind is that Hiranyagarbha from whom words along with the mind return without reaching. One who meditates on the happy nature of Hiranyagarbha dose not fear at any time - Thus ends the Rgmantra. This manomaya is indeed the inner self of the previous one (Pranamaya). In fact Vijnanamaya is the self which is other than and interior to that manomaya. By that vijnanamaya this manomaya is filled. This vijnanamaya also is of human form only. This vijnanamaya is of human form in keeping with the human form of that manomaya. Faith alone is its head. Right understanding is the right side. Truth is the left side. Tranquillity is the trunk. Mahah is

the tail (as it were) which is the support. In this regard, there is the following Rg mantra.

Upto this is the Rg mantra compared to the previous one, it is very small. In the first two sentences, HG is defined. yato+ sah is HG. He is HG. Who? From whom the words return back, along with the mind. HG is he from whom words return back along with the mind. How? without reaching him. They try to reach HG and having gone towards HG they fail to reach him and they return back. What does it mean? It seems words are like people walking towards Amarnath and failing to reach they come back. Words and mind try to reach means they try to grasp, understand HG. Words try to grasp HG through verbal expression and mind try to grasp HG through thoughts or vrittis and both fail. Words fail to describe him and mind also fails to conceive HG.

Why do they fail? The words and mind belong to vyashti and HG is samashti. How can the vyashti comprehend the samashti. Taking our own physical eye. Virat is total. With our physical eye, we can see a part of Virat. All these trees, mountain etc we see is virat. Because of the innate limitation of our eyes, we can see only a part of Virat. The total includes countless stars and galaxies and insects and viruses. So many microbes are there in this hall which we are not able to see. Because our eyes are limited. So too, our mind is also limited. We cannot comprehend all knowledge. Vyashti mind has vyashti knowledge. For example how many branches of science are there?. Even in one science how many branches are there. Each doctor specialises in one branch of medicine. ENT will not know eye. Ophthalmologist you have to go. He knows only ear nose and throat. Even ophthalmology he is not thorough because there too we have specialisation. Who is HG? He is omniscient. Being total mind, he stands for total wisdom. We can never think of comprehending HG, what is that mind having total knowledge. So upanishad says they come back. That is HG.

This sentence is to be taken as revealing the oneness of individual and total. Upanishad does not directly reveal the oneness. In last prakaranas upanishad was more clear. It presented the total as cause. In pranamaya, it was not that elaborate. It only said samashti sustains the vyashti. Why the Upanishad does not say? Upanishad expects us to recollect last argument and argue in the same manner. Individual mind is born of samashti mind and sustained by and goes back to. So there is no individual different from the total. All these are to be supplied. With this oneness has been given. It is common for both uttama and madhyama adhikari. Purpose is different. For one it is for pravilapanam and for the other it is for upasana.

Uttama is ready for receiving the statement anyontara atma vijnanamayah. For the other, upasana has to be given. Here also mantra does not directly talk enjoin upasana but gives only the result. Anandam+ The meditator is here presented as vidvan. Here Brahman means HG. Sagunam Brahman is HG. Anandam means happiness. One who meditates on HG happiness (It will be said later what it is as - sa eko brahmana anandah.) Why do you take such a meaning? Vidvan is knower and Brahman as nirgunam Brahman. Why do you twist. Yato vaco also fits for that meaning. The reason is simple. We are still in manomaya kosa. If you

bring it here, later mantras will not fit in. Not only that. Same mantra is going to be repeated later. There it is kutascaneti. There we will interpret as nirgunam Brahman and knower. Why can't you do the other way around. You cannot put the cart before the horse. Through saguna you go to nirguna and not reverse. This is called mimamsa. Through analysis we have to establish the right meaning.

The result of upasana is: he does not get fear at any time. Remember the siksha valli. Apnoti svarajyam.. He is lord of all devatas. So there is no fear. This is the result while living. After death, the result will be gaining HG oneness. It is two-fold everywhere. If it is practised sakaamatayaa. For nishkama, you know the result. He becomes fit for knowledge, i.e., pravilapanam. He can go to pravilapanam. With this rgmantra is over. Manomaya-mana aikyam is completed.

Now the Upanishad picks up the thread and formally concludes the manomaya topic. It is exactly as in pranamaya. This is sarira atma of pranamaya. It gives a title for manomaya. It was given to pranamaya also. Pranamaya is no more sarira atma for you now. tasya purvasya pranamayasya esha manomayah is sarira atma. Now uttamadhikari is waiting to do pravilapanam of manomaya into vijnanamaya. He is waiting to convert the manomaya into manomaya anatma or manomayakosa.

The pattern is same. Upanishad now says atma is anayah. Previously it said manomaya is atma. Now it withdraws its own word. Really speaking manomaya is not atma. It is something else means it is not atma. It does not directly say manomaya is anatma. It is anyah means manomaya is not atma. This is called pravilapanam. That means manomaya is anatma, meaning it is name and form, meaning it is mithya, meaning it does not have existence eof its own. It is resolved into where. Vijnanamaya anyah atma is clue for pravilapanam. What is the name of that atma. It is vijnanamaya. Where is it present? It is within. Indicating that at your journey is not outside, but it is internal. What is it meaning? Nothing but withdrawing identification from manomaya and identifying with vijnanamaya. That means, internal journey is that aham buddhi is taken away from manomaya and it is replaced in vijnanamaya. It is within what? It is within the manomaya. Now you can say kosa. What is that manomaya. Tasmat means that which was discussed in the previous section and etasmat refers to what is available for our direct experience. The idea is that manomaya need not be revealed by sastram. It is something known to us already. Every moment we have some feeling or other, angry etc. Then we are experiencing our manomaya alone. Sastra is not pramana for manomaya. It is only doing anuvada. This is true for all the kosas. Annamaya is there not because sastra says. it is already known to us. When it reveals something new, it is called pramana vakyam. When it talks of something which we know, it is anuvada vakyam. What is newly revealed. Ananda Atma, Brahma puccham pratishtha, that is revelation. That is pramana vakya. If these are known to us already, why Upanishad wastes time in talking about them. Why not directly tell about the atma. Upanishad uses the known kosas as stepping stone

for revealing the unknown. Because travel is always from known to unknown. This is known as tatastha lakshanam. So etasmat is used. It is vijnanamaya now. Later it will become kosa.

Uttama adhikari has identified with vijnanamaya after resolving manomaya and manah. They don't go away. They are very much there for experience. But in our buddhi we know that they don't have substance like shirt or fabric has not satta of its own even when we see them. The change is only in wisdom. The Upanishad has to cater to the madhyama adhikari. A upasana has to be prescribed. Samashti on vyashti. Alambanam must have a form. It does not have its own shape. So it is gong to borrow the shape of its container, that is manomaya. Tena+ By that vijnanamaya atma, this manomaya kosa is filled. So the vijnanamaya has human shape alone. How is it having human shape. It is in keeping with manomaya which has human shape. Now you need kalpana of limbs

Of that vijnanamaya, faith is head. Right understanding is right side. Truth is left side. Yoga means concentration of mind. It is atma, the central portion. Mahah is HG, the samashti. We have to see the significance of the kalpana. If you take the five koas, anna and pranamaya are together called karya atma. Manomaya is called karana atma. Vijnanamaya is called kartru atma and anandamaya is bhoktru atma. Anna and prana are final product. So karya atma. Mind is karana because instrument. Ahankara is agent and so karta. Ananda is final receiver or enjoyer of the results. Atma is none of them. When identified with anna and pranamaya, atma becomes a karyatma. When identified with mind, it is karanatma and so on. So vijnanamaya is the place where karta is there. Karta is referred, especially when vedic actions is to be done, (Eating etc are not important. When action like rituals are done, karta becomes important. So karta always means doer for vedic rituals.) For that performance of rituals, you require sraddha. Sraddha to do, you should have to believe that forefathers survive after death and they are in different lokas and that what I do will go to them. There is no scientific proof for any of them. All of them are atindriya or paurusheya. Veda alone is pramana for apaurusheya vishaya. So sraddha is head.

Rtam and satyam are pakshas. I should have knowledge in keeping with sastra. Other wise I cannot do the karmas. Yatha jnanam tatha karanam is satyam. Otherwise he will compromise with the results. These are important for karta. Any karma requires concentration. Samadhanam is important. So yoga is atma. Vyavasayatmika buddhi is yoga. HG has been taken as support. It is unlike the previous ones. They were all part of respective body. Here the preparation is done for taking the samashti as support which is going to come in the next level. In this aspect also there is a following rgmantra which points out the oneness of individual and total.

वेदात्मनः मनोमयस्य हिरण्यगर्भत्वज्ञानम्, वेदात्मोपासनाफलम्

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह इत्यादि (एतेन स्तुतिवाक्येन भयमात्रं निषिध्यते, न तु भयहेतुः। मनोमयज्ञानेऽपि अविद्यायाः अनिवृत्तेः। ब्रह्मसाक्षात्कारे तु न बिभेति कुतश्चन इति भयहेतुमपि निषेत्स्यति) ।(हिरण्यगर्भाभिन्न-मनोमयात्मानम् उपास्य तमेव साक्षात्कृतवतः इह कदाचन भयं न भवति, पतिते अस्मिन् शरीरे ब्रह्मलोके अप्रतिघज्ञानहिरण्यगर्भभोगसम्यरूपफलम् भवति तत्रापि कदाचन च्युतिरूप-भयं, गर्भवासादिदुःखरूपं न भवति) तस्य पूर्वस्य प्राणमयस्य एष एव आत्मा शारीरः शरीरे प्राणमये भवः शारीरः। कः । यः एष मनोमयः।

विज्ञानमयस्य मनोमयाद्वैलक्षण्यम्, तद्व्यापित्वं च

न। अशून्यत्वात् (अप्रविष्टप्रदेशशून्यत्वात् - प्रवेष्टव्यप्रदेशशून्यत्वाद् ब्रह्मणः नोक्तविधयापि प्रवेशः युक्तः इत्यर्थः।) । न हि कार्यात्मना परिणतनामरूपकार्यदेशव्यतिरेकेण (कार्यात्मना परिणतस्य ब्रह्मणः तावद् नामरूपात्मककार्यदेशे प्रवेशः वक्तुं न शक्यते। मृत्कार्यस्य मृदा तदवयवैरिव च ब्रह्मकार्यस्य स्वस्य ब्रह्मणा तदवयवजीवैष्ट जन्मप्रभृत्येव व्याप्तत्वात्, नापि तदतिरेकेण आत्मना शून्यः कश्चित्प्रदेशः अस्ति यं प्रदेशं स्वावयवभूतेन जीवात्मना ब्रह्म प्रविशेद् इत्यर्थः) आत्मशून्यः प्रदेशः अस्ति, यं प्रविशेज्जीवात्मना।

There is no place where it is not. Hand enters because it was not there before. There is no place where karana is not, becuase karana pervades everything including space which is karya. Atmasunya pradesa is not there. Isavasyam idam sarvam.

कारणमेव चेत् प्रविशेत्, (नात्र कारणस्य कार्ये प्रवेशः कथ्यते। किं तु कार्यविशेषस्य जीवस्य कारणे तस्य च परिच्छिन्नत्वात् प्रवेष्टृत्वोपपत्तिः चेद् इत्यर्थः।) (सिद्धान्ती तमपि निराकरोति - जीवात्मत्वं जह्यात् इति) जीवात्मत्वं जह्यात्। यथा घटः मृत्प्रवेशे घटत्वं जहाति। (यदा जीवः स्वकारणे प्रविशेत् तदा स्वकीयं जीवात्मत्वं एव जह्यात् परित्यजेत् इत्यर्थः)। तदेवानुप्राविशत् इति च श्रुतेः कारणानुप्रवेशः न युक्तः।

Then there will be no creation. When karya enters karana? When karya laya is there. Karyatva goes. Some of these dogs, they eat of one of the litters. You won't be here to ask the question. Enter is a sakarmaka dhatu. Object of pravesa. Tad only means crated world. It can not become the subject. Karma is mentioned by that tat word.

कार्यान्तरमेव स्यात् इति चेत्। तदेवानुप्राविशत् इति जीवात्मरूपं कार्यं (सद्) नामरूपपरिणतं कार्यान्तरमेव (ब्रह्म) आपद्यते इति चेत् (नामरूपात्मना परिणतं ब्रह्म जीवात्मरूपं कार्यं सदेहादिरूपं कार्यान्तरं एव आपद्यत इति अयमर्थः विवक्षितः, स्थूलोऽहं कृशोऽहं इत्यादिरूपेण अहंशब्दार्थस्य जीवस्य शरीराद्यभेदेन अनुभवाद् अनुभवानुसारेण श्रुत्यर्थवर्णनस्य न्याय्यत्वात्, तथा च ब्रह्मणः अन्येन जीवेनात्मना प्रवेशः इति सिद्धमिति भावः)। न

(प्रमाण) विरोधात्। (कार्यान्तरस्य कार्यान्तरापत्तेः विरुद्धत्वात् इत्यर्थः) न हि घटः घटान्तरमापद्यते। (जीवस्य देहादिभावः वास्तवः इति पक्षे विरोधान्तरमाह - व्यतिरेकेति) व्यतिरेकश्रुतिविरोधात् च। जीवस्य नामरूपकार्यव्यतिरेकानुवादिन्यः श्रुतयः (योऽयं विज्ञानमयः) विरुध्येरन्। (जीवस्य देहादिभावः वास्तवः इत्यत्रैव बाधकान्तरमाह - तदापत्तौ इति) तदापत्तौ (जीवस्य देहादिलक्षणकार्यान्तरापत्तौ इत्यर्थः) मोक्षासंभवाच्च। (असंभवमेव विवृणोति - न हि इति) न हि यतो (यस्मात्) (देहादिलक्षणाद् बन्धाद् इत्यर्थः) मुच्यमानः तदेव आपद्यते। (दृष्टान्तमाह - न हि इति) न हि श्रृङ्खलापत्तिः बद्धस्य तस्करादेः (मोक्षः भवति)। (यथा श्रृङ्खलया बद्धस्य चोरादेः या श्रृङ्खलापत्तिः विद्यते सा एव तस्करादेः न हि मोक्षः भवति तद्वत् इत्यर्थः)।

Paratma which became jivatma became body etc. That is called entry. We have to take other experiences also like sleep. In sleep there is no sthuloham is another experience. So that is not right. One karya does not become another karya. If jive became body, then it does not remain to enjoy svarga phalas. Why not vada becomes fat outside, inside it becomes another fat. One given karya does not become another karya. Also srutis will be contradited that which state atma is separate from namarupa sanghata. Suppose jivatma became the very body, there is no question of moksha. Physical body is subject to all limitations. And there is no release from it. You don't become free by gaining the same thing that you want to get free from. Unless you are already free, there is no way of becoming free. Yasmat is yatah.

बाह्यान्तर्भेदेन परिणतमिति चेत् - तदेव कारणं ब्रह्म शरीराद्याधारत्वेन तदन्तर्जीवात्मना आधेयत्वेन च परिणतमिति चेत्। न। बहिष्ठप्रवेशोपपत्तेः। न हि यो यस्यान्तस्थः स एव तत्प्रविष्ट इत्युच्यते। बहिष्ठस्य अनुप्रवेशः स्यात्, प्रवेशशब्दार्थस्य एवं दृष्टत्वात्। यथा गृहं कृत्वा प्राविशदिति।

It got modified into locus etc i.e., body etc. outside and then inside it got modified into jiva. It divided itself into external and internal. The idea is that he entered as adheya. No. if he became jiva inside at the time of creation itself, he is available inside. So how can he enter. What is outside alone can enter. We do not call one who already obtains inside, as one who entered. Again, there is no way of getting moksha, if Brhaman became jiva.

जलसूर्यादिप्रतिबिम्बवत् (जले सूर्योदेः प्रतिबिम्बवत् सूर्यादिप्रतिबिम्बवत् इति सप्तमी, षष्ठी त्पुरुषः।) प्रवेशः स्याद् इति चेत् । न। अपरिच्छिन्नत्वात् अमूर्त्तत्वाच्च। परिच्छिन्नस्य मूर्त्तस्य अन्यस्य अन्यत्र प्रसादस्वभावके जलादौ सूर्यादेः प्रतिबिम्बोदयः स्यात्। न तु आत्मनः, अमूर्तत्तवात्, आकाशादिकारणत्वात् which is hetu for vyapaktvam). व्यापकत्वात्, तद्विप्रकृष्टदेश-प्रतिबिम्बाधारवस्त्वन्तराभावाच्च प्रतिबिम्बवत्[49] प्रवेशः न युक्तः। (यद्यपि अयं पक्षः न असंमतः

[49] We do see reflection of formless space in water etc, in crystal reflection of colour which has no form (नीरूप because रूप does not have रूप)

तथापि वास्तविकमेव नामरूपविकारेषु परमात्मनः प्रतिबिम्बात्मना प्रवेशः इति अभ्युपगच्छतां केषांचिदयं पक्षः अत्र निरस्यते।)

That pratibimba is the entry. It is close to us. But we say it is as though. So it si also dismissed. Atma is not limited. It has no form. So formless cannot reflect. But space is seen in water. An object having a form and limited viz., sun etc, in something other than itself i.e., water which is clear there is reflection. But not for atma that is formelss. Atma is cause of space itself. How it is going to reflect. So there is no remote or removed place from atma where the water-like which is adhara for reflection can exist. Such an object is not there everything being atma.

एवं तर्हि नैवास्ति प्रवेशः। न च गत्यन्तरमुपलभामहे। "तदेवानुप्राविशत्" इति श्रुतेः। श्रुतिश्च नः अतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम्। न च अस्माद्वाक्याद् यत्नवतामपि विज्ञानमुत्पद्यते। हन्त तर्हि अनर्थकत्वाद् अपोह्यमेव तद्वाक्यम्। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति।

We do not know what to do here. Ther eis no entry possible. We have no other go. But Sruti is there. Sruti is meant to give us knowledge with respect to objects which are beyond our means of knowledge like senses. So we have to find out what is the meaning. But inspite of effort, we have done so much enquiry, we do not get any knowledge from this entry vakya. Alas! So we drop this vakya. As it has no meaning. Why not say it is interpolation. Sruti is kept very tight with different radings. So no interpolation. If you give up this vakya, some one will give up another vakya, especially tattvamasi we will drop because it is not convenient. Annam brahmeti vijanat - we will keep.

न। अन्यार्थत्वात्। किमर्थमिदम् अस्थाने। प्रकृतः ह्यन्यः विवक्षितः अस्य वाक्यार्थः अस्ति, स स्मर्तव्यः। "ब्रह्मविदाप्नोति परम्" "सत्यं ज्ञानमनन्तं ब्रह्म" "यो वेद निहितं गुहायां" इति। तद्विज्ञानं च विवक्षितम्, प्रकृतं च तत्। (एवंसूत्रमन्त्रयोः प्रकृतस्य ब्रह्मावगमस्य प्रवेशवाक्यपर्यन्तं अनुवृत्तिमाह - ब्रह्मस्वरूपेत्यादिना।) ब्रह्मस्वरूपावगमाय (अनन्तता-अवगमाय) च आकाशादि-अन्नमयान्तं कार्यं प्रदर्शितम्। ब्रह्मावगमश्च आरब्धः (अनुवृत्तः, तस्मिन् सृष्टिवाक्ये अपि) (निर्विशेषब्रह्मावगमः पञ्चकोशविवेकः)। (एवं सृष्टिवाक्ये अनुवृत्तस्य च तस्य विज्ञानमयवाक्ये अपि अनुवृत्तिमाह - तत्रेति) तत्र अन्नमयाद् आत्मनः अन्यः अन्तरः आत्मा प्राणमयः, तदन्तर्मनोमयः, विज्ञानमयः इति विज्ञानगुहायां प्रवेशितः। (ननु एवं आनन्दमयस्य मुख्यात्मत्वं सिध्येत् अन्योऽन्तरः आत्मानन्दमयः इति वाक्येन तस्यैव बुद्धिगुहास्थत्व-अभिधानात् इत्याशङ्क्याह - तत्रेति) तत्र च आनन्दमयः विशिष्टः (प्रियादिविशिष्टः एव आत्मा तत्र प्रवेशितः न शुद्धचिद्धातुः विशिष्टश्च अमुख्यः आत्मा इत्युक्तम् इत्यर्थः) आत्मा प्रदर्शितः। ततः परम् (आनन्दमयाधिगमानन्तरम् इत्यर्थः) (ननु आनन्दमयाधिगमस्य आनन्तर्योक्तिसिद्धविशुद्धब्रह्माधिगमोपायत्वं कथमित्यत आह - आनन्दमयलिङ्गेति) आनन्दमयलिङ्ग-अधिगम-द्वारेण (आनन्दमयः एव विशिष्टः अर्थः विशेष्यस्य

शुद्धचिद्धातोः लिङ्गं, विशिष्टस्य (आनन्दमयस्य) विशेष्यस्य (आनन्दस्य) अव्यभिचारित्वदर्शनात्।) आनन्दवृद्ध्यवसानः (आनन्दवृद्धेः वक्ष्यमाणायाः अवसानः अवधिभूतः निरतिशयानन्दरूपः इत्यर्थः।) आत्मा ब्रह्म पुच्छं प्रतिष्ठा (प्रतिष्ठाशब्दार्थमाह - सर्वविकल्पास्पदः इति) सर्वविकल्पास्पदः (सर्वकल्पनाधिष्ठानत्वादेव वस्तुतो निर्विशेषत्वमाह - निर्विकल्पः इति) निर्विकल्पः अस्यामेव गुहायां अधिगन्तव्यः इति तत्प्रवेशः प्रकल्प्यते। (तथा च आनन्दमयरूपलिङ्ग-अधिगम-द्वारेण आनन्दवृद्ध्यवसानभूतः आत्मा यथोक्तः आनन्दमयगुहायामेव अधिगन्तव्यः इत्यभिप्रेत्य बुद्धौ द्रष्टृत्वादिरूपेण उपलब्धिरेव तस्य ब्रह्मणः प्रवेशत्वेन प्रवेशवाक्ये कल्प्यते गौण्या वृत्त्या उपचर्यते इत्यर्थः। तथा च वक्ष्यति - तदनुप्रविष्टम् इव अन्तर्गुहायां बुद्धौ द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ इत्येवं विशेषवद् उपलभ्यते। तदेव प्रवेशः इति।) (बुद्धौ एव प्रवेशकल्पने हेतुमाह - न हि अन्यत्र इति। बुद्धेः सकाशाद् अन्यत्र ब्रह्मचैतन्यस्य अनुपलम्भाद् इत्यर्थः) न हि अन्यत्र उपलभ्यते ब्रह्म, (तत्र हेतुमाह - निर्विशेषत्वात् इति) निर्विशेषत्वात् (व्यञ्जकपदार्थरूपः यो विशेषः तत्संबन्धरहितत्वाद् इत्यर्थः)

No. We have to look at from a different angle. We go back to the starting and see. Then what is anyartha? sthane is avyaya (in any vibhakti you can use) Tyaga of the vakya is not proper. Vakyasya nirvishayatvam is not sthane. Then what is the meaning. For this sentence, there is another (other than wha tis dismissed) meaning for the entire text gone by. vivakshita is what is intended. We have to recollect what is prakrita or what is originally said. The mantra vakya and brahmana vakya look at. There is one vakya, one subject matter. There is expectancy about Brahman. It is satyam jnanam anantam. Where to know? One who knows it in the cave of intellect, he enjoys a phalam. Guhanihitatvam alone, obtaining in the guha is vivaksha. So brahmavijnanam is what is intended to be revealed. To complete the expectations, there is whole sastra. To establish limitlessness of it, it was said everything from space to body came from Brahman. They were presented as brahma karya. There is anuvritti of knowledge of Brahman until vijnanamaya guha. That which is at the end of growth of ananda in the form of priya etc. as culmination. Anandamaya is linga for knowing that Pure Brahman. It is the basis for all vikalpas like priya etc. as well as all previous kosas, vyashti and samashti. It self is nirvikalpa. It cannot be savikalpa. Duality depends on nondual. So in anandamaya guha (buddhi) where all vikalpas resolve, we can know.

विशेषसंबन्धः हि उपलब्धिहेतुः दृष्टः, यथा राहोः चन्द्रार्कविशेषसंबन्धः (सच्चिदानन्द - न हि छायारूपस्य राहोः वस्तुत्वं दृश्यत्वं वा अस्ति स्वतः। अथ च चन्द्रेण अर्केण वा विशेषेण संबन्धे सति दृश्यत्वभ्रान्तिः उपजायते, "चन्द्रः सूर्यो वा अर्धं ग्रस्तो राहुणा" इति सविशेषव्यवहारयोग्यत्वभ्रान्तिः च) (व्यञ्जकपदार्थः विशेषपदस्यार्थः)। एवम् अन्तःकरणगुहासंबन्धः ब्रह्मणः उपलब्धिहेतुः। (ननु बुद्धौ एव ब्रह्मचैतन्यस्य उपलब्धिः इति न नियमः। घटः स्फुरति, पटः स्फुरति इत्यादिप्रकारेण बुद्धेः अन्यत्रापि तस्य (ब्रह्मचैतन्यस्य) उपलब्धिदर्शनात् इत्याशङ्क्याह - संनिकर्षात् इति) संनिकर्षात् (वृत्तिद्वारा बुद्धिसंबन्धादेव तत्रापि उपलब्धिः इत्यर्थः)। (आ.गिरि - अन्तःकरणसंसर्गादेव देहघटादिषु चैतन्याभिव्यक्तिः न स्वतः। अन्तःकरणं च अव्यवधानेनैव चैतन्य-अभिव्यञ्जकम् अन्वयव्यतिरेकाभ्यां इत्यर्थः) (बुद्धेः चैतन्यव्यञ्जकत्वे युक्तिमाह - अवभासात्मकत्वात् च इति)

अवभासात्मकत्वात् च (प्रकाशात्मकत्वाद् इत्यर्थः। अन्तःकरणस्य प्रकाशात्मकत्वम् आलोकादेरिव स्वाभाविकमेव, न तु तप्तायःपिण्डादेरिव अन्यकृतमित सूचनार्थः चकारः।) अन्तःकरणस्य। (बुद्धिवृत्तेः घटादिषु चैतन्यव्यञ्जकत्वं सदृष्टान्तमाह - यथा च इति। आदिपदं नीलपीतादिसग्रहार्थम्) यथा च आलेकविशिष्ट-घटाद्युपलब्धिः, (सच्चिदानन्द - यथा बाह्यविषयत्वसाम्ये अपि सूर्यचन्द्रदीपाद्यालोकः एव स्वान्यावभासकः स्वभावविशेषात्, एवमन्तःकरणमपि सत्वगुणप्राचुर्यस्वभावात् प्रत्ययात्मना परिणतम् आत्माभिमान-आलम्बनं भवति इत्यभिप्रत्याह - यथा इति) (यथा नीलपीताद्युपलब्धिःआलोकसंबन्धकृता तथा विषयेषु आत्मनः स्फुरणरूपेण उपलब्धिः अन्तःकरणवृत्तिलक्षण-आलोकसंबन्धप्रयुक्ता इत्यर्थः) एवं बुद्धि-प्रत्ययालोकविशिष्ट-आत्मोपलब्धिः स्यात्। (एवं अन्वयव्यतिरेकाभ्यां बुद्धेरेव ब्रह्मोपलब्धिसाधनत्वमिति प्रसाध्य प्रकृतमुपसंहरति - तस्मादिति। मन्त्रे यद्गुहायां निहितमिति गुहानिहितत्वं प्रकृतं तदेव प्राविशदिति अनेन पुनरुच्यते इत्यर्थः।) तस्मात् उपलब्धिहेतौ गुहायां निहितमिति प्रकृतमेव। (तर्हि पौनरुक्त्यं स्यादिति शङ्कां वारयति - वृत्तिस्थानीये इति) वृत्तिस्थानीये (वृत्तिः व्याख्या। तथा च व्याख्यान-व्याख्येयभावापन्नयोः गुहानिहितप्रवेशवाक्ययोः न पौनरुक्त्य दोषः इति भावः) तु इह पुनः तत्सृष्ट्वा तदेवानुप्राविशदिति उच्यते।

That Lord, paratma, is prakrita. Moksha is freedom from being small, unhappy. Brahma might be taken as an object, even though it is said satyam+ Only source of knoweldge is yourself. That becomes complete by saying yo veda+ It is yourself. Where you know? In guha, intellect. It is available in all pratyayas. Cognition of mountain and the mountain too. First it is pratyaya. It is nityopalabdhi. Pratyaya is brahman, object crow also brahman. when it looks this way, it is again brahman, the caitanya manifest in it. Everything is Brahman (anantata) has to be pointed out. So it was said brahman is material cause. What about nimitta karana. There is only one cause. If you know he is efficient cause, you don't get anything. Only material cause means inert. It is to be known as bhoktru svarupa. If you can keep on increasing ananda, a point where it cannot, that limitless is Brahman. It is basis for these gradations of happiness. Anupravesa proves there is no parinama vada. He was intact after creation. So he entered. Pravesa is already started. You have room after room. Here five rooms. The seeker is taught. After annamaya is entry. Nirvikalpa - source of all vikalpas. This is true with anything. Take time. What is its source or truth? It has no time. You think past. When do you think something past. Now. it was past iti. Similarly future iti. now you think. There is only now. Now is the truth of time. What is the length of now? It has no length. No length of time is adhishthana for length of time. In pancadasi we have seen in first chapter. Waht is truth of time. timlessness. What is the truth of mind? mindlessness. Pravesa is a kalpana. No real pravesa. Where there is karya, there is karana. World is perceived or recognised in mind. Karanam of that world also where recognsied? Avabhasatmake antahkarane. In mind alone. Jagat is savikalpa. Karanam is nirvikalpa. Not elsewhere it is recognised. There is only here in the mind. How are you going to recgonsie Brahman. I have a horse? White, No. Red, no. It has eyes, no? You are talking of horse skeleton? No.

Archelogists go crazy with it. No visesha at all. How are going to recognise it? Knowing similar brahman you will gain limitless? Similarly Brahman. Nirvisesha. Visesha sambandha is there. How to see rahu. Not available for sight. Wait for eclipse of moon or sun. Mind is visesha-sambandha. In every cognition it is there. Pratibodha+ The connection between Brhaman and anandamaya guha, bhokta's svarupa, is upalabdhi hetu. In every enjoyment you are in your svarupa. (but avidya is there. So bhokta also in seed form. So you have to wait for bhokta to come for any experience of sukha. Sukha does come, It is to keep you going). An example is given here. Pot cannot be seen, unless light is reflected by it. For atma also, a buddhi vritti is required. That itself is aloka or light. That itself is means or place for reognition. So pravesa is talked. Levels of experinces are there. So they talk of going deep within. But really it is not.

(इदानीं प्रवेशशब्दार्थं कथयति - तदेव इदमित्यादिना। यद् आकाशादिकारणं प्रकृतं तदेव ब्रह्म इदं प्रत्यक्षादिसंनिधापितं कार्यं सृष्ट्वा इत्यर्थः) तदेव इदं आकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टम् इव (गुहादौ अनुप्रविष्टम् देवदत्तादिवस्तु यथा तदन्तर् उपलभ्यते तथा ब्रह्मापि बुद्धेः अन्तर् उपलभ्यते तथा च अन्तर् उपलभ्यमानत्वसाम्यात् प्रवेशशब्दः गौणः इत्यर्थः) अन्तर्गुहायां बुद्धौ द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ इत्येवं विशेषवद् (मतुप् नपुंसक) उपलभ्यते। तदेव तस्य प्रवेशः। (एवमक्षराणि व्याख्याय प्रवेशवाक्यस्यापि ब्रह्मसत्वसाधने उपयोगं कथयति - तस्मादस्ति इति) तस्मादस्ति तत्कारणं ब्रह्म (तत् प्रकृतं आकाशादिकारणं ब्रह्म अस्ति नास्ति इति न, प्रवेष्टृत्वाद् असतः प्रवेश-अदर्शनादित्यर्थः) । (ब्रह्मणो नास्तित्वाभावे फलितमाह - अत इति) अतः अस्तीत्येव उपलब्धव्यम्।

That Brahman which is cause of space etc having created the world, it obtains in it as if entered. Where? In buddhi cave, it obtains with viseshas (not as though here. Here it means with.) Viseshavat is neuter. What are the viseshas. All tric affixes. As knower etc. obtains. Though nirvisesham. Caitanyam is invariable in the hearer. Vritti is invariable in it. If you see the variable, you can know the invariable. That is contemplation. Anupravesa is creation of bhoktru prapanca. Now bhogya world has to be said. That also Brahman created. That is said now. Tadeva means being available in the mind as seer etc That alone is pravesa. So Brahma asti, being cause. Karyam being there. If karya is nonseparate from cause, karya is mithya. Karya therefore always appreciated as "is" Therefore, one has to take it as "is". So Brahman is not sunyam. Because nirvisesham, this doubt comes.

तत् कार्यम् अनुप्रविश्य। किम्। सच्च मूर्त्तम्, त्यच्च अमूर्त्तम्, अभवत्। मूर्त्तामूर्त्ते हि अव्याकृतनामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते। व्याकृते च मूर्त्तामूर्त्तशब्दवाच्ये ते आत्मना तु अप्रविभक्तदेशकाले इति कृत्वा आत्मा ते अभवद् इति उच्यते। किं च निरुक्तं चानिरुक्तं च। निरुक्तं नाम निष्कृष्य समानासमानजातीयेभ्यः (पञ्चमी। तेभ्यः निष्कृष्य)

देशकालविशिष्टतया इदं तद् इत्युक्तम्। अनिरुक्तं तद्विपरीतम्। निरुक्तानिरुक्ते अपि मूर्त्तामूर्त्तयोरेव विशेषणे। यथा सच्च त्यच्च प्रत्यक्षपरोक्षे (सत्शब्दवाच्यं प्रत्यक्षं भूतत्रयं मूर्त्तस्य अभेदेन वेशेषणं त्यत्शब्दवाच्यं च परोक्षं भूतद्वयम् अमूर्त्तस्य अभेदेन वेशेषणं तथा निरुक्तानिरुक्ते अपि इत्यर्थः) । तथा निलयनं चानिलयनं च (निलयनं च तथा निरुक्तवन् मूर्त्तस्य एव धर्मः इति संबन्धः)। निलयनं नीडम् आश्रयः। मूर्त्तस्य एव धर्मः। अनिलयनं तद्विपरीतम्। अमूर्त्तस्य एव धर्मः। त्यदनिरुक्तानिलयनानि अमूर्त्तधर्मत्वे अपि व्याकृतविषयाण्येव (अमूर्तत्वात् ब्रह्म न भवति) सर्गोत्तरकालभावश्रवणात्। त्यदिति प्राणाद्यनिरुक्तं (आदिपदाद् आकाशं) तदेव अनिलयनं च। अत विशेषणानि अमूर्तस्य व्याकृतविषयाण्येव एतानि। विज्ञानं चेतनम्। अविज्ञानं तद्रहितमचेतनम् पाषाणादि। सत्यं च व्यवहारविषयम्। अधिकारात्। न परमार्थसत्यम्। एकमेव हि परमार्थसत्यं ब्रह्म। इह पुनः व्यवहारविषयम् आपेक्षिकं मृगतृष्णाद्यनृतापेक्षया उदकादि सत्यमुच्यते। अनृतं च तद्विपरीतम्। किं पुनरेतत्सर्वम्? सत्यमभवत् परमार्थसत्यम्। किं पुनस्तत्?। ब्रह्म "सत्यज्ञानमनन्तं ब्रह्म" इति प्रकृतत्वात्। यस्मात् सत्त्यदादिकं मूर्तामूर्तधर्मजातं यद् किं च इदं सर्वम् अविशिष्टं विकारजातं एकमेव सत्शब्दवाच्यं ब्रह्म अभवत् (Brahman became iva whatever is, not only listed ones)। तद्व्यतिरेकेण अभावाद् नामरूपविकारस्य तस्मात् तद्ब्रह्म तत्सत्यमित्याचक्षते ब्रह्मविदः।

Having entered in the form of bhokta, bhogya also has to be talked. That is pointed out here. Akasadi is sadharana bhogyam. Common elements. Common in everything. That it created first. Sat is formful elements and tyat is formless. Akasa and vayu. The word "ca" means abhava. In laya, they are not there. In avyakrta avastha. World was in the form of unmanifest name and form. Creation is manifest form of these two types of elements. An existent jagat cannot be created. Nonexistent jagat also not, like son of vandhya. So no starting. Murtam and amurtam - both of them which are unmanifest and which exist in atma, as nonseparate from atma, they are now differentiated. Who does this? Not pradhana. (Sankhya's) it is inert. So it is said, by atma vyakriyete - manifested (nimittakaranam). So with the help of maya. Antargatena means adhishthanaatmana.

Now the question is - if pot maker makes the pot, he does not become pot. Here abhavat is used. So it is not only nimittakaranam, it is also upadana karanam. Nothing being away from it, it became that. That which is the obejct of the words, murta and amurta, these two things (dual) which being not separate, undivided from atma in time and space. Pot maker is divided from the pot in time and place. Even if he enters the pot, he cannot become that. So it is said, atma became those two. So Brahman alone is in the form of bhokta as well as bhogya.

Further, it became various elementals. What can be very clearly stated of them, distinguishing it from everything. (from things belonging to same jati as well as vijati. Like a fruit - it is mango. This is alphonsoe. If both same, you qualify by desa. Left hand. You cannot distinctly say the difference between fragrance of jasmine and krasantom. Difference between the taste of laddu and jilebi. You cannot say it is round and it is wheel like. That is murta-dharma. I am asking of amurta-dharma. What can you talk of space. Nilayanam is support. Again dharma of murta. Fragrance is asrita - flower is asraya. It is anilayanam. Love etc - there is no way of seeing. Mind is nilayanam. A doubt here. Murta is created and amurta is not created (being formless). No. Amurta also created. We are making a distinction for understanding. We are not talking here dharma of murta and amurta in the avyakrta state. In vyakrta state we are talking. Abhavat is there every where. After creation we are talking. So amurta also belong to created. Tyat is vayu etc and they are aniruktam in that category. It is also anilayanam. Not an asraya for any given thing which you visually see. Viseshanas of that are of manifest name and form only. Vijnanam means cetanam. Opposite of it is avijnanam. It is stone etc. Satyam means vyavahara satyam. Anything that exists in vyavahara stage that which cannot be sublated unlike rope snake. Water is satyam in comparison to mirage water. Adhikarat. Context. Another satyam is there which became this satyam. So this has to be vyavahrika satyam. Why not two satyam be there? No it is one. If two, then we have to find out a third cause. The word satyam is used for name and form because asti iti it is known. So too pratibhasika also appreciated as is. In its own time, it is, but on enquiry, it is known as asatyam. So apeksha buddhya. Satyam became both satyam and anrtam. What is that satyam which is paramartha.

Why that is called paraamrtha satyam. It is because whatever that is here characterisded by sat and tyat and their dharma - everything means everythng and it is not apekshika like we use relatively all are having umbrella so avisishtam is used - means that Brahman became and the created objects do not exist apart from it. Yat brahma sarvam abhavat tat satyam. Now he sums up the whole thing.

अस्ति-नास्ति-इत्यनुप्रश्नः प्रकृतः, तस्य प्रतिवचनविषये एतदुक्तम्। आत्मा अकामयत बहुस्याम् इति। स यथाकामं च आकाशादिकार्यं सत्त्यदादिलक्षणं सृष्ट्वा तदनुप्रविश्य पश्यन् श्रृण्वन् मन्वानः विजानन् बह्वभवत्। तस्मात् तदेव इदमाकाशादिकारणं कार्यस्थं परमे व्योमन् हृदयगुहायाम् निहितं तत्प्रत्यय-अवभासमानविशेषोपलभ्यमानमस्तीति (तस्मिन् हृदयगुहाशब्दिते प्रत्यये साक्षिणा प्रतीयमाने अन्तःकरणे यः अयमात्मचैतन्यस्य अवभासमानः विशेषः पश्यन् श्रृण्वन् इत्यादिभाष्येण प्रदर्शितः द्रष्टृत्वादिरूपभेदः तेन रूपभेदेन उपलभ्यमानं प्रकाशमानं ब्रह्म इत्यर्थः) विजानीयाद् इत्युक्तं भवति तद् एतस्मिन् अर्थे ब्राह्मणोक्ते एषः श्लोकः मन्त्रः भवति। यथा पूर्वेषु अन्नमयाद्यात्मप्रकाशकाः पञ्चसु एवं सर्वान्तरतमात्मास्तित्वप्रकाशकः अपि मन्त्रः कार्यद्वारेण भवति।

He tells the connection. Brahma asti because yat karyam, tat sakaranam, like pot.karyam asti, karanamapai astyeva. A person is happy because of something. A vairagi is happy not because of something. So ananda svarupa brahma is. He desired and created the world which consisted of some order so that further creation keeps taking place. Jiva is not staya sankalpa. He has to accomodate the situation. Isvara is satya sankalpa. So he became many in keeping with sankalpa. He is available in buddhi alone where world is appreciated. Buddhi means pratyaya. That which shines there. As what? As seer, hearer etc. viseshavat Brahma. May you know that Brahman to be existent. (annad vai praja+ pranam deva+ yato vaco+ vijannam yajnam+ asanneva sa bhavati etc

Swami Paramarthananda

A doubt may be there. Brahman asti. Because It is in the form of jagat. That means karanam is implied. Both seem to be overlapping. Karanam and remaining in the form of karya - both are same. When we say, Brahma asti - jagatrupena vartamantvat. Which karanam is implied - here upadana karanam. In the first - we have to emphasize nimittakaranatvat. Sokamayata it is said. Upadanam karanam became sat and tyat etc.

Satyam and anrtam means vyavaharika and pratibhasika. Paramarthika satyam creates both the other two ones.Who creates that satyam? Question is wrong. It is causeless. Absolute, objective and subjective reality. Objective because all can see. Subjective is I alone see. Others see it as rope. Dream. Ghost. Objective reality is considered real by common people. Subjective is taken as unreal. Fool lies - it will come out in two minutes. An intelligent man keeps it going longer time. His bluff is also bluff only. In short, anythng, not only the listed objects, everything that is here, that Brahman alone became iva. There is rgmantra regarding Brahman itself manifesting as creation.

Anuvaka 7

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मान ँस्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै सः। रस ँह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति। यदा ह्येवैष एतस्मिन् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्वेव भयं विदुषोऽमन्वानस्य। तदप्येष श्लोको भवति।

इदम् अग्रे असद् वै आसीत् । ततः वै सद् अजायत। तद् आत्मानम् स्वयम् अकुरुत। तस्मात् तत् सुकृतम् उच्यते इति। यद् वै तत् सुकृतम्। सः वै रसः । रसम् एव हि लब्ध्वा अयं आनन्दी भवति। यद् आकाशे एषः आनन्दः न स्यात् कः एव हि अन्यात् कः प्राण्यात्। एषः एव हि आनन्दयाति। यदा एव हि एषः एतस्मिन् अदृश्ये अनात्म्ये अनिरुक्ते अनिलयने अभयं प्रतिष्ठां विन्दते अथ सः अभयं गतः भवति। यदा एव हि एषः एतस्मिन् उद् अरम् अन्तरं कुरुते अथ तस्य भयं भवति। तत् तु एव विदुषः अमन्वानस्य भयं (भवति) तद् अपि एषः श्लोकः भवति।

असद् - the unmanifest (Brahman); वै इदम् - this universe; अग्रे - in the beginning; आसीत् - was indeed; ततः वै - from that alone; सद् - the manifest (universe); अजायत - was born; तद् - that (Brahman); आत्मानम् - itself; स्वयम् - by itself; अकुरुत - created; तस्मात् - therefore; तत् - it; सुकृतम् - well-done; उच्यते - is said to be; इति - thus ends the Rgmantra; यद् वै - which is indeed; तत् सुकृतम् - that well-done; रसः - is ananda; सः वै - that Brahman; रसम् हि एव - this ananda alone; अयं - this individual; लब्ध्वा - having attained; आनन्दी भवति - becomes fulfilled; कः हि एव - who will indeed; अन्यात् - inhale; कः प्राण्यात् - who will exhale; यद् एषः - if this; आकाशे - in the (inner) space; आनन्दः - Brahman; न स्यात् - were not there; एषः हि एव - this Brahman alone; आनन्दयाति - fulfils all; यदा हि एव - when indeed; एषः - this (wise person); एतस्मिन् - in this Brahman; अदृश्ये - which is invisible; अनात्म्ये - bodiless; अनिरुक्ते - undefinable; अनिलयने - (and) supportless; अभयं प्रतिष्ठां - firm establishment; विन्दते - attains; अथ - then; सः गतः भवति

- he attains; अभयं - fearlessness; यदा हि एव - when indeed; एषः - this (ignorant person); एतस्मिन् - in this Brahman; उद् - even; अरम् - the slightest; अन्तरं - difference; कुरुते - makes; अथ - then; तस्य - for him; भयं भवति - there will be fear; तत् तु एव - that Brahman itself; भयं - is the source of fear; विदुषः - for one who is learned; अमन्वानस्य - but ignorant (of Brahman); तद् अपि - in this regard also; एषः श्लोकः - the following Rgmantra; भवति - there is

This universe was indeed the unmanifest (Brahman) in the beginning. From that alone, the manifest (universe) was born. That (Brahman) created itself by itself. Therefore, it is said to be welldone. - Thus ends the Rgmantra. That Brahman which is indeed the self creator is ananda. Having attained this ananda alone, this individual becomes fulfilled. Who will indeed inhale and who will exhale if this Brahman were not there in the (inner) space. This Brahman alone fulfils all. When indeed this (wise person) attains firm establishment in this Brahman which is invisible, bodiless, undefinable and supportless, then, he attains fearlessness. When indeed this ignorant person makes even the slightest difference in this Brahman, then, there will be fear for him. That Brahman itself is the source of fear for one who is learned but ignorant of Brahman. In this regard there is the following Rgmantra.

Swami Paramarthananda

Upto iti is rgmantra. End is iti. idam agre asat asit. This entire universe before its creation was in the form of asat or unmanifest form. It is not nonexistent. This asat has two aspects. One is Brahman and the other is name and form in unmanifest form called maya. (Brahman + maya). Both are avyakta. from that isvara alone, (When we say brahman created, we have to understand maya sahitam alone). Sat means visible universe. It has reference to asat. Sat kim? If you remember Tattvabodha, it is problem. Why upanishad is confusing us? The reason is - when anything is in karana form, you don't know whether it is and you don't know it. So it is as though nonexistence. From our standpoint, it is said as asat. Like baby in the womb is not taken into while taking census. It is not counted and so it is called asat. Karya is not something new, but asat alone appearing as karya. Maya throws out names and forms and it becomes visible. Avyakta maya becomes vyakta prapanca. Like branches etc in the seed becoming visible when manifest. When maya becomes vyakta, how Brahman becomes vyaktam? It is in the form of jiva, cidabhasa. Maya prapancarupena vyaktibhavati. Brahman jivarupena vyaktibhavati. When this isvara wanted to create the world, where did he go for raw material? Svayam. He was raw material. Svapradhanyena nimittam. Svaupadhi-pradhanyena upadanam ca bhavati. Isvara is karta. He is also object. Instruments also he. Chisels. Atma atmanam atmana atmani srjati. Brahman himself (means without karanam or instruments) created. You cannot ask how it is possible? Daily we do. Dream. Since he himself created, so it is called well-done. Or svayam krtam or self-done. Self done means value is more. It is done in house. There will be more care. This is another reason for brahma asti - **sukrtatvaprasiddheh**. World is well known as well done. Rg mantra supports the first reason.

The next three sentences viz yadvai tad+ taken together. This portion is taken as fifth reason. Rasatva prasiddheh. Rasa means ananda. That Brahman which became this sukrta world, is indeed ananda. Ananda experienced by all people. Even a beggar. When he gets five rupees, normally when he used to get fifty paise. Even in hell, when a person sees his neighbour also all of a sudden, while going to the cauldron, like if the neighbour's current also goes, when mine goes, there is ananda. Ananda is well known to all. Since Brahman is anandam, so it is. How do you say that ananda is Brahman? That ananda only proves vishaya is.

Ananda does not belong to vishaya. Brahmananda manifests in vritti as priya etc. Very same vishaya, car, is there with other people also. I am happy sitting in the car. But the owner also sitting in the same car but he is not happy. Pop music one is happy. Another is not happy. First laddu is happy. 13th laddu does not give. So happiness cannot be the nature of objects. If so it should give happiness to all people at all times at all places. Fire has heat as nature because it gives heat to all people at all times and in all places. So only source of ananda is Brahman.

One more arguement. Let us assume sense objects give ananda. In the case of sleeping man, he has ananda or not? He has. Nobody will go to bed otherwise. How much we suffer for sivaratri. So much we will suffer to go to sleep. That ananda is from which object. No vishaya there. So brahmananda alone.

Suppose you argue sleep is a blank state. A wise person who has no sense objects is happy. It comes from where? He has no wife or children or possessions. Kaupina pancaka remember. mulam taroh. He is happy. So his own nature it is. So brahmananda.

Ananda is fulfillment. Fulfillment is purnatvam. Lack is sorrow. Not lacking/missing anything is happiness. Only thing is - purnatvam expressed is ananda. Unexpressed it is limitlessness or ananta. Brahman alone is anantah and purnah. Anything in the world is limited. So they cannot be ananda. If we are still experiencing ananda in life, it must be coming from Brahman alone. We have ruled out all possibilities. Senses, mind, body cannot give. No other source of ananda. objects and body(s) do not contain ananda.

So raso vai sah. **Anandaprasiddheh** Brahma asti. Word rasa is used for ananda. We experience this ananda in three different ways.

Ignorant adopt the way of through gain of sense objects. Like the number lock getting opened when the numbers are in alignment. Here also all should be in alignment like what we want is in front. The instruments of experience is intact like eye for TV. Wonderful murukku but no teeth. Mind should be in mood. It is carried away by past remembrance or future anxiety etc. They run around here and there. **vishayadvara**

The second way that naturally takes place is in sleep where all desires are resolved. All jealousies are resolved. All comparisons are resolved. Effortlessly available. **sushuptidvara**

The third method of enjoying this ananda is jnani's method. Who owns up his nature and directly enjoys purnatvam. By knowledge he is trptah. **jnanadvara.**

Since people enjoy happiness either through one of these methods, so Anandam Brhama asti. Everyone becomes happy by getting this ananda of Brahman alone. Unfortunately, we attribute it to other factors. When I open the tap water comes and close it, I don't get. So tap provides water - I cannot say. Children saying bottle gives milk. Vishaya is like pipe line and Brhaman is like overhead tank. Jnani goes to tank. Tap always gives problems. Dirt is there at the neck. This is fifth reason. **Anandarupa Brahma asti.**

The sixth reason is from kohyevanyat+ Brahma asti **karananam ceshatadarsanat**+ All our organs are functioning. Any instrument intelligently functioning, there must be a conscious entity or principle governing or controlling it. If there is a machine or car functioning orderly, there must be a conscious mechanic or driver behind. Cetana adhishtitam sat, acetanam pravarttate. When we analyse like that, body also is made up of matter only, made of five elements. Assembly of spare parts. You can change the parts including bones. Mind also inert only. It is made of subtle elements that is all. Matter is gross. Energy is subtle. Both are inert. But it functions intelligently. Mouth talks whatever it wants. That principle has to be cetanam. Upanisad talks of this in a different form. In a negative way like if that was not there, this can not be. Ananda is atma here. Akase. If brahmatma was not there in the hrdaya akasa, who will do exhalation (anyat) and inhalation (pranyat). Meaning who will survive as a living being. It will be a matter world only. So brahma asti.

In Ramayana, Sugriva calls Vali again second time. Tara tells Vali, if Sugriva calls you again, there must be some other principle, because of which alone this weak one is roaring. It is inference. This plastic mango and real mango - what makes the difference is cetana tatvam. Here, **caitanyarupena Brahma asti**. There it is **anandarupena** brahma asti. This atma alone fulfills all. This will fit in with the previous section. Because of ciatanyam alone one can enjoy iti we can fit in here also.

Now comes the seventh and final reason. yada hyevaisha etasmin adrsye + here the upanisad says Brahman alone is the source of fear and it alone is source of fearlessness also. Since we find both categories of people, so Brahman is there. **Bhaya-abhaya-hetutvat brahma asti**. How can same Brahman be cause of both fear and absence of fear. For those who know Brahman as it is, for them Brahman becomes source of fearlessness. When the very same Brahman is misunderstood, it becomes source of fear.

Innocent rope on the road, is cause of fear when misunderstood as snake. As rope, it is no cause for fear. Same telegram (you were expecting a news about sick person, at that time) when wrongly known becomes source of fear and when you read, source of happiness. It was good news that you have got some fortune. So too with Brahman. It is abhaya hetu because it is one and so identical with me. There is triputi bheda iti Brahman is understood. So, jiva-jagat and jiva-jiva bheda causes all problem from raga dvesha. In sleep there is no bheda at

all. So we are happy there. Waking up, tensions begin. So bheda is cause of fear and sorrow. Jiva-isvara bheda also causes fear only. Only seeming security it gives like world giving me security. Once I see jiva-isvara difference, I see him as samhara karta. He is frightening. kalosmi lokakhaykrit pravriddha, lokan samahartum iha pravrittah. He is called yama causing fear. Jnani does not see a second thing. If he sees, it is only a shadow. A wooden elephant does not cause fear. One who does not see differences, establishes in Brahman gains fearlessness. What kind of Brahman? Not perceptible (not object, so no vikara and hence adrsye also means avikare according to Sankara). anatmya means free of bodies. anirukte means which is indescribable. which does not have any asraya. It is the support of everything. So advitiya Brahman. So in that no bhedas exist. So jiva or world or Lord cannot threaten me.

Abhyam is adverb. Fearlessly gets established. If you have to own up your Brahman nature, we have to disown our worldly personality which is ego. I cannot say I want both. For gruel and moustache you cannot desire. I am father of so and so etc. We have fallen in love with our individuality and our relationships. Maintaining relationship is possible, only when I want individuality. To disown individuality is to disown relationships. It is bitter to listen. So people hesitate to come to Vedanta. It requires courage to give up individuality. So fearlessly word is used. People love jivabhava. Eva is important. yada eva, the moment he gets established in Brahman, immediately he attains fearlessness. In medicine, you have to wait. In advertisement it is okay. Next minute they show smile. Here it is immediate. Nishtha in Brahman is nishtha in jnanam. Brahma jnanam means Brahma ahamasmi iti jnanam. nishtha means freedom from doubts and erros in the knowledge. If two questions are asked, doubt comes means not firm.

When this ignorant person sees a little bheda, ud means api aram means alpam - alpamapi. Antaram is bhdea of any type. Sajatiya etc. In that advayam Brahma, world is there as part. Brahman is one. Jivas and world are part of it. Like tree is one, in that there are many branches which are real. Plurality is real and part of nonduality. Svagatabhda also we donot accept. They accept svagata bheda. Here that is also negated. If you see, you will have fear. tat tu means that very Brahman becomes the source of fear. Which is abhaya for jnani. Here vidushah means one who is learned in other sastras, For him it becomes cause of fear. Amanvanasya - if he does not know Brahman. If I am a jiva, I become a victim of the world. Not only as kalarupa, Lord is source of fear, but as a master also. He will give punishment iti. In this regard, there is following rgmantra, that Brahman is cause of fear as master.

असद् वै इदम् अग्रे आसीत् । असद्-इति व्याकृतनामरूपविशेषविपरीतं (व्याकृतौ नामरूपात्मकौ विशेषौ यस्य जगतः तद्विपरीतम् कारणम्) अव्याकृतं ब्रह्म उच्यते। न पुनः अत्यन्तमेव असत्। न हि असतः सज्जन्मास्ति। इदम्-इति नामरूपविशेषवद्व्याकृतं जगत्। अग्रे पूर्वं प्रागुत्पत्तेः ब्रह्म एव असच्छब्दवाच्यम् आसीत्। ततः असतः वै सत् प्रविभक्तनामरूपविशेषम् अजायत उत्पन्नम्।

किं ततः प्रविभक्तं पितुरिव (पञ्चमी) पुत्रः?। न इत्याह । तद् असच्छब्दवाच्यम् स्वयम् (स्वयम् अन्य-अनधिष्ठितम् सद्) एव आत्मानम् (आत्मानमेव जगदात्मना कृतवदित्यर्थः) अकुरुत कृतवत्। यस्मादेवं (यस्माद् ब्रह्म स्वयमेव (व्याकृतनामरूपात्मकेन रूपान्तरेण) कृतवद् इत्यर्थः। सूपसर्गस्य शोभनवाचिनः स्वयंशब्दनिर्दिष्टम् अपरतन्त्रत्वलक्षणं शोभनम् इत्यर्थः। कर्मार्थकस्य अपि क्तप्रत्ययस्य च्छान्दस्या प्रक्रियया कर्तृत्ववाचित्वस्वीकारात् कृतमित्यस्य कर्त्रर्थः) तस्मात् तत् ब्रह्मैव सुकृतम् स्वयं कर्तृ उच्यते । स्वयं कर्तृ ब्रह्म इति प्रसिद्धं लोके (लोकशब्दिते शास्त्रे) सर्वकारणत्वात्। (सच्चिदानन्द - सूकृतशब्दस्य लोकप्रसिद्धपुण्याथर्कत्वमादायापि व्याख्यातुं शक्यं वाक्यमिति उपक्रमते - यस्माद्वा इति० यस्माद्वा स्वयमेव अकरोत् सर्वं सर्वात्मना, तस्मात् पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते (यद्वा ब्रह्म स्वयम् आत्मानमेव सर्वं जगद् अकरोत् यस्मात् आत्मानमेव सर्वजगद्-आत्मना अकरोत् तस्मात् तदेव कारणं ब्रह्म पुण्यरूपेणापि अवस्थितं सत्सुकृतमुच्यते इति योजना) । सर्वथा अपि तु फलसंबन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके। यदि पुण्यं (अचेतनं फलम्) यदि वा अन्यत् (फलादिदातारम् ईश्वरं) सा प्रसिद्धिः (सुकृतशब्दवाच्यपुण्यस्य सा फलसंबन्धादिकारणत्वप्रसिद्धिः आशुतरविनाशिनः जडस्य पुण्यकर्मणः स्वतः फलदातृत्वायोगात् नित्ये सर्वज्ञे ब्रह्मणि सति एव उपपद्यते इत्यर्थः) नित्ये चेतनकारणे सति उपपद्यते। तस्मादस्ति ब्रह्म, सुकृतप्रसिद्धेः (सुकृतस्य फलसंबन्धादिकारणत्वप्रसिद्धेः इत्यर्थः) ।

Pujya Swamiji

Before asat alone was. Idam means this world and it was sat alone. We can also say, this world was asat, not in the vyakrita form. Asat here means avyakrita form. Without differentiations. bijasyantar+ Now vyakritam brahma. It is not tuccham. Vandhya son does not give birth to a child. Naiyayika says, there is ghata-abhava. From that pot is produced. Parinama is kapila. Arambhavada is kanada. Asan ghata is now ghata. It is an independent existent dravya for him. It wa snot there before creation. How a nonexistent pot come into being. It cannot. So avyakrita. Existent cannot also come into being. Yes. We say it was avyakritam.

From that sat is born. Vibhata means divided. Differentiated is pravibhaktam. Like all parts of a tree become distinct now. Before in seed. Did it come out like son from father as something separate. Born of me but not part of me. Parents think they are part of me and cidlren proves all the time that I am not extension of you. No. This is the difference between father and Lord. Here Lord being the upadana karanam, world not separate from vastu. Brahman himself (nimittam) created atma as jagat (upadanam). In dream we do the same thing. Because Brahma created the world itself out of itself, Tat is that created world. He dressed himself as the world. So svayam karta. We are committed to prove the astitva of Brahman. So we explain here is karta. What is shobhana here? He himself did. So shobhanam. I myself did it. No help at all. With my own hands I did. (They say 7th day God

got tired. So there is holiday. In jewish tradition they don't work on Saturday. It is a myth, belief. Lord created. That is all. Bhagavan did not have big job.)

Sukritam means punya also. Brahman is called punya. You can give another meaning if nothing is voilated like sastra, logic and anubhava. Not like Veda danta became vedanta. Wisdom tooth how it is necessary for masticaltion, so too you require veda danta to chew the contents. Jagat is well-done also okay. But here it is not very appropriate. All the laws that connect karma to punya is also punyam.

In the world of astikas, the word meaning of sukrita is well known to be the cause. Phala is divine body. Punya itself you cannot enjoy. Like money itself you cannot enjoy. You cannot eat it. It has to be converted into desirable things. So too good karma produces punya or sukritam. It is the cause of buying goodies. Like good body, heaven, svarga bhoga etc. Sukritam becomes casue for connecting jiva to result of actions. Sukrita is prasiddha. So Brahman is asti becasue without cetana Brahman, there prasiddhi cannot be there. So whether you take it as svayam kartru or sukritam, both ways brahma asti is established. Phalasambandhadi is seen. That is possible only when cetana Brahma is there. So punya is prasiddha means brahma is there. cetanam ca karanam ca. If bhagavan passes away, after giving a word, you do this yanja, you will get this result, how can you get the phalam? It is not mechanical. Sukrita is Brahman. Or what he created is sukrita. Because He is perfect. It requires omniscient entity. From that we understand karta asti. So Brahma asti. क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमताम्। क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।। अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं । श्रुतौ श्रद्धां बद्ध्वा दृढव्यतिकरः कर्मसु जनः।।

इतश्चास्ति। कुतः? रसत्वात्। कुतो रसत्वप्रसिद्धिः ब्रह्मणः इत्यत आह - यद् वै तत् सुकृतम्। रसः वै सः । रसो नाम तृप्तिहेतुः। आनन्दकरः मधुराम्लादिः प्रसिद्धः लोके। रसम् इव अयं लब्ध्वा प्राप्य आनन्दी सुखी भवति। न असतः आनन्दहेतुत्वं दृष्टं लोके। बाह्यानन्दसाधनरहिताः (कौपीनवन्तः) अपि निरीहाः (करणचेष्टावर्जिताः) निरेषणाः (नीरागाः) ब्राह्मणाः (सत्त्वगुणाः) बाह्यरसलाभादिव (यथा अविद्वांसः) सानन्दाः दृश्यन्ते विद्वांसः । नूनं ब्रह्म एव रसः तेषाम्। (एवं विषयाभावे अपि आनन्ददर्शनात्, विषयानुसंधानस्थले अपि विषयाणां वृत्तिविशेषद्वारा स्वरूपानन्दव्यञ्जकत्वमेव, न अविद्यामान-आनन्दसवरूपउत्पादकत्मिति प्रागावेदितम्। अतः सर्वप्राण्यानन्दहेतुत्वादस्ति तदानन्दकारणं ब्रह्म इत्युपसंहरति - तस्मादिति) तस्मादस्ति तत्तेषां आनन्दकारणं रसवद्ब्रह्म।

Being the cause of sukrita, brahma asti. For this reason also brahma asti. These are Brahmana portion. He being rasa. It is nothing to do with kitchen. Rasa means taste. Asthetic sense also rasa. Virya, soka, srngara etc. If man is sad, there is no sokarasa. He is very sadness. But when he represents himself, acting as though he has soka, then it is soka rasa. If somebody is really sad,. youc annot say to him, your sokarasa is good. Rasa is ananda here. It is gaunartha. Secondary sense. How Brahman is known as rasa. Rasa is taste. Brahman is not taste. That

which is sukrita, indeed, that is rasa. What is rasa? It is that which is cause of tripti. Which makes you happy. Taht navarasas also makes you happy. So it is rasa. Like sweet, sour etc. Also when they are mixed up also. Tasteful to your senses or mind. Nicely decorated and presented is tasteful. If they give a silver bowl with a piece of lemon. This fellow thinks it is for drinking. And ask for another bowl. There is music also. Ears also happy. There is fragrance around. But mind also should be happy. Server also should make your mind happy. It is not mere sweet etc. How rasa makes you happy, so too this atma makes you happy and so it is called rasa. Gaining this rasa Brahma, one is happy. Same food makes one happy and another sad. If more children in family, difficult to cook pleasing every one. The conclusion is that asat cannot make anyone happy. How can you say so, I am happy if this fellow is not there, goes away once and for all. Asat here means bilkul nonexistent. Not this man who is not there. He is asti. His presence or absence makes you happy. It is an asti person. Source of happiness so is. Vyatirekena ghatadivat. It is unlike example. Ghata is not source of ananda. Sense or body or mind or world cannot be source. They give you sorrow also. So it is different from them. Who is that. It is unlike everything. We do find jnanis getting happy without vishayas. Vishaya can be cause for vritti in which ananda is abhivyaktam. But not ananda. Even a beggar becomes happy wihtout any reason. Bahya and anandasadhana iti. So brahma asti. Rasavad, Brahma asti. Or rasavadbrahma asti. Vishaya does not author happiness. We account for it for enabling ananda manifestation. Demanding person is resolved in santavritti. Ego which had an agenda of its own, for the time being is resolved. Wanting-wanted division is resolved.

इतश्च अस्ति कुतः? प्राणनादिक्रियादर्शनात्। अयमपि हि पिण्डः जीवतः (मृतदेहं व्यावर्तयति - जीवतः इति) प्राणेन प्राणिति, अपानेन अपानिति, इत्येवं वायवीयाः ऐन्द्रियकाः च चेष्टाः (वाचा अभिव्याहरति, पाणि ना गृह्णाति, पद्भ्यां गच्छति, पायुना विसृजति, उपस्थेन आनन्दति, चषुषा पश्यति, त्रोत्रेण श्रृणोति, घ्राणेन जिघ्रति, जिह्वया रसयति, त्वचा स्पृशति, अन्तःकरणवृत्तिभिः च यथायथं मनुते etc संहतैः (assembled together- is important) कार्यकरणैः निर्वर्त्यमानाः दृश्यन्ते। तच्च एकार्थवृत्तित्वेन (एकप्रयोजनसाधनत्वेन) संहननं नान्तरेण चेतनं असंहतम् संभवति (असंहतम् - संहतकार्यकरण-व्यतिरिक्तमित्यर्थः - असंहतम् चेतनं अन्तरेण संहननं न संभवति इति अन्वयः) अन्यत्रादर्शनात् (आ.गिरि - गृहप्रासादिषु स्वतन्त्रं गृहाद्यनारभ्यं (परतन्त्रं हि गृहादि स्वामिना आरभ्यं न स्वामी तेन आरभ्यः इति) स्वामिनमन्तरेण संहननस्य अदर्शनात्, कार्यकरणसंघाते अपि विलक्षणः स्वामी शरीर-उपचयादिभिः उपचयादिरहितः अवगम्यते। स च चेतनत्वेन भेदाभावात् ब्रह्मैव इ तदस्तित्वसिद्धिः इत्यर्थः) । तदाह - यद् यदि एषः आकाशे परमे व्योम्नि गुहायां निहितः आनन्दः न स्यात्। न भवेत्। कः हि एव लोके अन्यात् अपानचेष्टां कुर्याद् इत्यर्थः। कः प्राण्यात्। प्राणनं वा कुर्याद् । तस्मादस्ति ब्रह्म। यदर्थाः कार्यकरणप्राणनादिचेष्टाः (अन्यथा भोक्तुरभावेन कार्यकरणचेष्टानां वैयर्थ्यप्रसङ्गात्) तत्कृतः एव च आनन्दः लोकस्य। कुतः? एष हि

एव पर आत्मा आनन्दयाति आनन्दयति। सुखयति लोकं धर्मानुरूपम्। स एव आत्मा आनन्दरूपः अविद्यया परिच्छिन्नः विभाव्यते प्राणिभिः इत्यर्थः।

Again it is because we see activities of breathing in and out. Living is there. Upalakshana for all other activities. Samhati arguement is given here. Thousands of simple anatomical names are there (leave laone biological names) What do you get out of it? For whom is the hand? Legs are for whom? One part is not for the welfare of the other part. Leg is not for hand. Any one is not main. Every bone is a spare part. Samhatanam karyakarananam ekasya cetanasya artham. (anyarthatatvat) Karyaarana is only means for accomplishing various ends; for whom it accomplishes? Not for the sanghata. He should be cetana. Cetana alone is purpose. landslide - boulder came down. It came down for whose sake? Mountain wanted release. No. To turn you into bhakta. If cetana also put together means anavastha. Ultimately it is asamhata. Impartite it should be. You cannot say sambhavati, because it is not seen anywhere.

सः यः कश्चित् एवं यथोक्तं ब्रह्म उत्सृज्य उत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमस्मीत्येवं वेत्तीति एवंवित्। (वेदवस्य उत्कर्षादिरहित-अद्वितीय-स्वप्रकाश-ब्रह्मविषयकत्वलाभे हेतुमाह - एवं शब्दस्य इति) एवंशब्दस्य प्रकृतपरामर्शार्थत्वात्। सः किम्। अस्माल्लोकात् प्रेत्य। (लोकशब्दस्य प्रत्यक्षसिद्धभोग्यमात्रपरत्वं व्यावर्त्तयति - दृष्टादृष्टेति) दृष्टादृष्टेष्टविषयसमुदायो हि अयं लोकः तस्मादस्माल्लोकात् प्रेत्य प्रत्यावृत्य (अस्माल्लोकात् प्रेत्य इत्यनेन सर्वस्मात् कर्मफलाद् वैराग्यं विवक्षितमित्याह - निरपेक्षो भूत्वा इति) निरपेक्षः भूत्वा (एवं विरक्तो भूत्वा प्रथमं पुमान् किं करोति तत्राह - एतमिति) एतं यथोक्तं अन्नमयमात्मानमुपसङ्क्रामति (क्रमु पादविक्षेपे १ उ.प ४ प.प. सङ्क्रम् to go) विषयजातञ्च अन्नमयात्पिण्डात्मनः (विषयजातमित्यनेन व्यष्टिपिण्डव्यतिरिक्तः समष्टिपिण्डात्मा विराडुच्यते) व्यतिरिक्तं न पश्यति, सर्वं स्थूलभूतमन्नमयात्मानं पश्यति इत्यर्थः। ततः अभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम् (पश्यति)। अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुप-सङ्क्रामति। अथैवंविद् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते।

Any given person who knows in this manner. Evam means what? All that is said so far is covered by evam. There is a prakara involved. That Brahman as described so far. Giving up the upadhi dharma. How do you give up? It is understanding that it is upadhi dharma. It is not removing and throwing. Superimposed attributes are negated. One who knows I am that in this manner. Evam vid can mean anything if you do not remember what has been discussed. So evam can only recall what is said already. It can not mean anything else. What does he do? From this world. What is this world? This world characterised by only ishtavishaya. Because you do not have to have vairagya for anishta vishya. With reference to what you have thrown. Not others' garbage. Ishta vishayas are seen or unseen. Leaving this world means being not dependent on any one of them for his security or ananda. This is called dead to this world. He goes to ananda maya atma. He goes through a particular process. Anna converted to rasa which becomes body. It is anna maya and atma. Gross world is Virat and Brahman is in that form. He sees his body as nonseparate from that Virat. Pindatma is body. In the cosmic person this body is included. Sarvatmatvam he gains. Then inside that is pranamaya. Not with

reference to given body. Which obtains in all bodies as sutratma and is undivided and pervades all prana, mind and buddhi. He sees subtle body as nonseparate from HG. Also as puccha of Anandamaya that is Brahman. Since there is no duality, he abides in fearlessness. Jagat is mithya. Satyam is not afraid of satya because mithya being satyam. Word mithya should be understood as term indicating reality. Mithya is not jagat. Satyam is also pointing out reality, reality param. Avidya mithya. Jagat is mithya. So how from avidya jagat came? It is due to non-understanding.

तत्रैतत् चिन्त्यम्। कोऽयमेवंवित्, कथं वा संक्रामति इति। किं परस्मादात्मनोऽन्यः संक्रमणकर्त्ता प्रविभक्तः, उत स एव इति। किं ततः। यद्यन्यः स्यात्, श्रुतिविरोधः - "तत्सृष्ट्वा तदेवानुप्राविशत्" "अन्योऽसावन्योऽहमस्मीति न स वेद" "एकमेवाद्वितीयम्" "तत्वमसि" इति। अथ स एव आनन्दमयमात्मानमुपसंक्रामति, कर्मकर्त्तृत्वानुपपत्तिः। (किं च तयोरभेदपक्षे किं जीवस्य परस्मिन् अन्तर्भावः किं वा परस्य जीवे। नाद्यः, तथा सति परव्यतिरेकेण जीवाभावाद् अचेतनानां संसारित्वासंभवाच्च अनुभूयमानं संसारित्वं परमात्मनः एव प्रसज्येत इत्याह - परस्यैव इति) परस्यैव संसारित्वं (द्वितीये देषमाह - पराभावो वा इति। जीवनियन्तृत्वेन श्रुतिसिद्धस्य परस्याभावः प्रसज्येत इत्यर्थः) पराभावो वा। (पक्षद्वये अपि अपरिहार्यं दोषं श्रुत्वा मध्यस्थः चिन्तामाक्षिपति - यद्युभयथा इति) यद्युभयथा (जीवस्य परस्मादन्यत्वे अनन्यत्वे च इत्यर्थः) प्राप्तः दोषो न परिहर्त्तुं शक्यः इति, व्यर्था चिन्ता। (ननु अभेदपक्षे प्राप्तः दोषः वक्ष्यमाणरीत्या परिहर्त्तुं शक्यते इति वदन्तं चिन्तारम्भवादिनं प्रति मध्यस्थः आह - अथान्यतरस्मिन् इति) अथ अन्यतरस्मिन् पक्षे दोषाप्राप्तिः, (परापरयोः वास्तवौ भेदाभेदौ इति पक्षान्तरं निर्दुष्टं मन्यमानस्य भास्करादेः अभिप्रायमनूद्य तस्मिन्नपि पक्षे चिन्तावैयर्थ्यमाह - तृतीये वा इति) तृतीये वा अदुष्टे पक्षे स एव शास्त्रार्थः इति व्यर्था एव चिन्ता।

There again this is to be really thought over. Evam vid means what? It means how does he gain something? Brahmavid gains atma. No, I have a doubt in this. There is a karta for the action. That karta is he different or separate from paratma. Is he different from Brahman. Who gains the paratma. They ask the question thinking you are finished. Does jiva gain paratma. Or Paratma gains paratma. Paratma cannot gain paratma because it has no hands and legs and eyes and ears or mind. If jivatma gains, he cannot gain without losing himself. Then he does not gain. If he remains as jiva and gains paratma, then he is still a jiva. So jiva is separate from atma. So dvaitins come here. Retaining jivatma you become one with paramatma (amoebas). Thus they say. Paratma is sankramana karta is also problem. Either way there is difficulty. If you say sankramana karta is different, there is sruti virodha. Sruti says - creating, it entered. We saw both are same. Again sruti directly negates bheda. If one thinks I am different and Isvara is different. Mahavakya is there. If to avoid this paksha, you say paramatma is sankaramana karta and gains paramatma. Pot gains potness. Subject and object

are one and the same. How it is possible. If you ride on your shoulders it is possible. Karma here is object.

If you say paramatma includes jiva, it will be samsari. Why paramatma should cross all this? To gain moskha! Then it is samsari. I thought I was samsari. But I discover Lord is also samsari. Here is an insecure fellow. He married. The other more insecure. Now doubly insecure. If jiva includes paramatma, there is no paratma. Samsaritvam is only for paratma. I am samsari. That I is paratma. So paratma is samsari due to ignorance.

Why should you begin this vicara. No use. Either way caught. Certain questions are like that. You should not answer both ways. Do you go in front of a fool or behind the fool. If you go in the front, you lead fools. You become mukhya fool. Behind means you follow his. I do not go any where around. You have to say. Since no conclusion is possible, do not do this enquiry. No, one is okay. If one of them is okay, then let it be right. Why then vicara? Like that mulla. You know two friends had horses. One is white and the other red. They had stable also for them. ....Suppose one is right and understood as right, no need for vicara. What are you going to arrive at after enquiry. If there is a third paksha, like bhedabheda, like tree and its avayavas, that will be sastrartha. One of them is right - how to find out? Or there is a third paksha - how to know? So the siddhanti answers.

न, तन्निर्धारणार्थत्वात् (चिन्तां विना निर्धारणासंभवात् इथि भावः।) । (संग्रहवाक्यं विवृणोति - सत्यमिति आदिना) सत्यं प्राप्तः दोषः न शक्यः (न शक्यः इत्यत्र यदिशब्दः अध्याहर्त्तव्यः) परिहर्त्तुम् अन्यतरस्मिन्, (अन्यतरस्मिन् प्राप्तः दोषः यदि न परिहर्त्तुं शक्यः सत्यं चिन्ता व्यर्था स्यादिति अन्वयः) (अदुष्टे तृतीये पक्षे अवधृते सति वा चिन्ता व्यर्था स्यात् इति अन्वयः) तृतीये वा पक्षे अदुष्टे अवधृते व्यर्था चिन्ता स्यात्। न तु सः अवधृतः इति तदवधारणार्थत्वात् अर्थवती एषा चिन्ता। (पुनरपि मध्यस्थचिन्तावैयर्थ्यमाह - अर्थवती इति) सत्यम् अर्थवती चिन्ता, शास्त्रार्थावधारणार्थत्वात्। चिन्तयसि त्वम्। न तु निर्णेष्यसि (त्वया निर्णेतुमशक्यमित्यभिसंधिः), (अभिसंधिमानेव तटस्थं निराकरोति - किमिति) किं न निर्णेतव्यमिति वेदवचनम्। (यथाश्रुतं उपालम्भं तटस्थः परिहरति - नेति) न (वेदवचनं न भवति इतयर्थः) । (न तु निर्णेष्यसि इत्यत्र हेतुं पृच्छति - कथं तर्हि इति) कथं तर्हि (यदि न वेदवचनं तर्हि कथं न निर्णेष्यसि इति वदसि इत्यर्थः)। (निर्णयस्य अशक्यत्वे स्वाभिसंहिते हेतुमाह - बहु इति। अद्वैतस्य एव वेदार्थत्वात् तत्साधनपरः त्वमेक एव, भेदवादिनः पुनः असंख्याताः। ततश्य कथं तेषु जीवत्सु तव निर्णयसिद्धिः इत्यर्थः।) बहुप्रतिपक्षत्वात्। एकत्ववादी त्वम्, वेदार्थपरत्वात्। बहवः हि नानात्ववादिनः वेदबाह्याः त्वत्प्रतिपक्षाः। अतो ममाशङ्का - न निर्णेष्यसि इति। (शतमप्यन्धानां न पश्यति इति न्यायमाश्रित्य आरम्भवादी परिहरति - एतदेव इति) एतदेव मे स्वस्त्ययनम् (निर्णयसामर्थ्यसूचकमित्यर्थः) (कल्याणम्) यन्मामेकयोगिनम् (एकत्ववादिनम् इत्यर्थः) अनेकयोगि-बहुप्रतिपक्षमात्थ (अनेकयोगिनः नानात्ववादिनः बहवः प्रतिपक्षाः यस्य स तथा,

तमित्यर्थः)। अतो जेष्यामि सर्वान् (नानात्वस्य मानशून्यतायाः तत्र तत्र उक्तत्वात् वक्ष्यमाणत्वात् च इति भावः)। (एवमात्मैकत्वस्य वादिविप्रतिपत्त्या संदिगधत्वात् तन्निर्णयाय मुक्तिफलकत्वाच्च विषयप्रयोजनवतीम् आत्मतत्वगोरां चिन्तामारभते - आरभे च इति) आरभे च चिन्ताम्।

Vicara is to arrive at the conclusion. Why I stopped you, do you know why? You only do vicara, but never come to conclusion. This cinta is meaningful to arrive at a nirnaya. Yes. It is useful. But on this particular issue, you are not ascertaining any thing conclusively. Why do you say so. We should only do cinta and not come to conclusion iti it is vedic mandate. Every cinta will not have any nirnaya or should not come to a conclusion - thus no rule. In academic circles there are people like that who say keep the mind open all the time and not come to any conclusion on anything. No. No I do not say it is Veda vak. I say so because you have many opponents are there. Even after your conclusion, those fellows are not convinced. You are committed to Vedartha because Veda alone talks of ekatvam. All other pramanas prove nanatvam. If you do not accept that oneness, you become Veda bahyas, even though vaidikas. (Isvara allows you to be deluded. A king and a citizen. Citizen says I am king, he will lose his head). Nanatvavadis hit each other and destroy themselves. I am going to witness all this. Svastyayanam is kalyanam. You are telling me I am ekatvavadi. Aha ahatuh ahuh attha ahathuh (From bru dhatu). I have a challenge now. I will win them.

सः एव (परः एव) तु स्यात्, तद्भावस्य तु (तुशब्दश्चार्थः सन्पञ्चम्या संबध्यते) विवक्षितत्वात्। (विवृणोति - तद्विज्ञानेन इति) तद्विज्ञानेन (परब्रह्मविज्ञानेन) परमात्मभावः अत्र विवक्षितः - ब्रह्मविदाप्नोति परम् इति। (परस्य एवंविद्भिन्नत्वेऽपि ब्रह्मविदाप्नोति परम् इत्यत्र विवक्षिता परभावापत्तिः एवंविदः किं न स्यादित, न इत्याह न हि इति) न हि अन्यस्य अन्यभावापत्तिः उपपद्यते (अन्यस्य स्वरूपे स्थिते नष्टे वा अन्यात्मकत्वं न हि उपपद्यते इत्यर्थः)। (अभेदपक्षे अपि अनुपपत्तितौल्यमाशङ्कते - ननु इति) ननु तस्यापि तद्भावापत्तिः अनुपपन्ना एव। (यद्यपि ब्रह्मस्वरूपस्य सतः ब्रह्मविदः तद्भावापत्तिः मुख्या न संभवति, तथापि औपचारिकी सा संभवति इत्याह - न अविद्याकृतेति) न। अविद्याकृत-अतदात्मभाव-अपोहार्थत्वात् (अविद्याकृतः यः अयम् अतदात्मभावः तदपोहः एवार्थः पुरुषार्थः तत्स्वरूपत्वात् तद्भावापत्तेः न तद्भावानुपपत्तिः इत्यर्थः)। (हेतुं विवृणोति - या हि इत्यादिना) या हि ब्रह्मविद्यया स्वात्मप्राप्तिः उपदिश्यते (ब्रह्मविदाप्नोति परमित्यादिश्रुत्या इति शेषः), सा अविद्याकृतस्य अन्नादिविशेषात्मनः आत्मत्वेन अध्यारोपितस्य अनात्मनः अपोहार्था। (देवदत्तस्य ग्रामादिप्राप्तिवद् अत्र मुख्यां प्राप्तिं विहाय अमुख्यप्राप्त्यर्थकता फलवाक्यस्य केनहेतुना अवगम्यते इति पृच्छति - कथमिति) कथमेवमर्थता अवगम्यते। (परप्राप्तिसाधनत्वेन ब्रह्मविद् इति विद्यामात्रोपदेशात् सकार्याविद्यानिवृत्तिरेव परप्राप्तिरिति गम्यते इत्याह - विद्यामात्रेति) विद्यामात्रोपदेशात्। (ननु अप्राप्तप्राप्तिरपि विद्यामात्रफलं किं न स्यादिति। नेत्याह - विद्यायाः च इति) । (लोके शुक्तितत्वादिगोचरविद्यायाः) विद्यायाश्च दृष्टं कार्यमविद्या निवृत्तिः। तच्चेह विद्यामात्रमात्मप्राप्तौ साधनमुपदिश्यते।

Paratma only is karta. It is a big hetu. para bahvasya vivakshitatvat. What is intended to be said by the sastra is only gain of paratma. Brahmavid apnoti param. Naturally Evamvid is only paratma. Later he will say anyasya na anyabahvapattih. One pot cannot become another pot. Nor pot can become another object, whether alive or dead. If real bheda is there, jiva can never become paratma as long as alive. Nor dead, he will become. Never. How can you say so? Milk joins water and water becomes milk. No water remains water and milk remain milk. I do not see water. Do you see increase in quantity? That is water. If you vaporise water goes out. Density of milk remains same after water goes away. Brahmabhavasya vivaksha is there. So evam vid is Brahman. One becoming another is not possible.

This fellow thinks I am pot. I am therefore not anything else. Then, I am a fragile pot. I am a small pot. I have no job satisfaction. That pot is to be told clay alone is satyam. Being clay, it becomes clay. I am a pot is due to avidya and so what is required is elimination of ingnorance.

But pot cannot become cloth. That is okay. Pot also cannot become pot. So if evam vid is paratma, then how paratma become paratma. Paratmanah api paramatma bhavapattih na. No, it is not totally true. I have a situation. I say you are partma. You say no, no. Now you have to become paratma. If I am paratma, how I do not see. That is your problem. Tad bhavapatti is nothing but negation of what you are not. Avidya is the cause. of atad atma bahva. They have to be eliminated. Gain is said for the purpsoe of elimination of ignorance and ignorance born notions or erros. Anatma set up by avidya. Why should I eliminate it? It is superimposed. Anna is annamaya.

How do you get this meaning? I do not see anything like this in the sastra. Yes. That is why you require traditional acarya. Brahmavid param apnoti. Nothing else is said. Evam vid is brahmavid. he alone is talked all over. Abhayam pratishtham etc. he alone gains. Why not we say he gains heaven. You gain first marga vijnanam, margavid and then he has to do karma and that result is heaven. It is sukham. No. Here only knowledge is revealed. Nothing is enjoined to be done. All vakyas talk about vastu's nature. Unless I am Brahman, I cannot become Brahman by mere knowledge. Upasana is not a pramana and it cannot destroy ignonrace. Upasana is smrtirupa. Atma is to be taken as karta. So it will not remove any ignorance. It is mental action. 10th man is himself 10th man. (Vedas not even committed to action. It is only giving hita upadesa).

(आ.गिरि - अन्यथाप्युपपत्तिं शङ्कते - मार्गेति) मार्गविज्ञानोपदेशवदिति चेत्। तदात्मत्वे विद्यामात्रसाधनोपदेशः अहेतुः। कस्मात्। देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात्। न हि ग्राम एव गन्ता इति चेत्, (आ.गिरि - गन्तुः स्वतः ग्रामत्वाभावे अपि यथा मार्गज्ञानोपदेशः सार्थकः तथा जीवस्य स्वतः ब्रह्मत्वाभावे अपि विद्योपदेशः अभ्यासद्वारेण ब्रह्मप्राप्तिहेतुत्वादित्यर्थः)। न। (आ.गिरि - त्वं ग्रामोऽसि इति न तत्रोपदेशः। अत्र अभेदोपदेशः प्रतीयते। अतः उपदेशवैषम्याद् न दृष्टान्तः युक्तः इत्याह - वैधर्म्यात् इति) (दृष्टान्त)

वैधर्म्यात्। तत्र हि ग्रामविषयं ज्ञानं नोपदिश्यते, तत्प्राप्तिमार्गविषयमेव उपदिश्यते विज्ञानम्। न तथा इह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानम् उपदिश्यते।

Tadatmatve means brahmatvatve, which is the form of removing ignorance about my being Brahman, teaching of sadhana which is in the form purely knowledge is not cause for gaining paratma. Marga is given for reaching a village. The person himself is not village. By knowledge of that path, you do not gain the village. In margavijnana, you have to go after knowledge. Here abheda is there between goer and the road as well as village. The marga here is if at all like the foot prints of bird. One is bheda upadesa and the other is abheda upadesa. This is vaidharmya. That is, village knowledge is not given in the illustration, but only road knowledge is given. Much less, you are village iti it is not told.

(ननु ब्रह्मविदाप्नोति परं इत्यत्र विद्यामात्रश्रवणे अपि न तन्मात्रं परप्राप्तिसाधनत्वेन उपदिश्यते, किंतु संहितोपनिषद्युक्तैः कर्मज्ञानैः समुच्चितमेव ब्रह्मविज्ञानं, अतो विद्यामात्रोपदेशः असिद्धः इति पुनः शङ्कते - उक्तकर्मादि इति) उक्तकर्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यते इति चेत्। न। नित्यत्वान्मोक्षस्य (ब्रह्मविदाप्नोति परम् इत्यत्र समुच्चयोपदेशः न विवक्षितः इति प्रतिज्ञार्थः।) इत्यादिना प्रत्युक्तत्वात् (समुच्चयपक्षस्य इति शेषः। एवम् "तद्भावस्य तु विवक्षितत्वात्" इत्यादिना एवंवित् पर एव स्यादित्यत्र परप्राप्तिवचनं प्रमाणमित्युपपादितम्)। (तत्रैव हेत्वन्तरमाह - श्रुतिश्च इति।) (The evamvid arguement continues) श्रुतिश्च तत्सृष्ट्वा तदेवानुप्राविशत् इति कार्यस्थस्य (देहादिसंघातलक्षणे कार्ये साक्षित्वेन स्थितस्य प्रत्यगात्मनः) तदात्मत्वं (ब्रह्मस्वरूपत्वं दर्शयति इत्यर्थः।) दर्शयति। (एवंवित् पर एव इत्यत्र हेत्वन्तरमाह - अभयेति) अभयप्रतिष्ठोपपत्तेः च। (अभयप्रतिष्ठावचन-उपपत्तिमेव प्रपञ्चयति - यदि हि इति) यदि हि विद्यावान् स्वात्मनः अन्यन्न पश्यति, ततः अभयं प्रतिष्ठां विन्दते इति स्यात्। भयहेतोः परस्य अन्यस्य अभावात्। अन्यस्य च अविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्तिः । तद्धि द्वितीयस्य चन्द्रस्य असत्वं यद् अतैमिरिकेण चक्षुष्मता न गृह्यते।

But first chapter is full of moods. Bhava and ling lot and tavya. So you have to read this upanishad alongwith the previous chapter. It has so much sadhana. It is ekaprakarana. It is not that I am telling this. You yourself wrote a commentary on that. How can you forget your own bhashya. There is a fourth chapter also full of mantras. If you know that, you can do any ritual. Upasanas also mentioned there. You read this alongwith previous section - thus he says. Mere knowledge will not give you moksha. The karmas and upasanas said there are also sahakari means. For those sadhanas there is dependence of knowledge on them for gaining moksha. You synthesise both. Holistic approach. These two boys say: I will bring rice. You bring husk. We will mix and then do phu phu and then eat. No contribution here. So too karma.

I don't say the previous section I did not comment upon. Nor when I commented upon it my heart was not there - iti I do not say. I do not say whatever I commentated now forget it - this

also I do not say. What I say is that is a sadhana alright. It has a certain prayojana. We are talking about moksha from knowledge. Sadhana for paraprapti is only brahjma jnanam. There the sadhana is meant for preparing yourself. You gain adhiakritvam. It has nothing to do moksha directly. It is successively means. The only means for moksha is only vidya. We have already answered that moksha being nitya, karma has no role. Born moksha will be gone moksha. Anything born is gone. Jatasya hi dhruvo mrtyuh. So moksha cannot be born. Aryasamaji says there is no permanent moksha. You go to heaven and come back. It is only temporary. Like holiday though temporary, yet all seek that.

Atma obtaining in the karya karana, that is body mind sense complex, is the creator who entered after creation. Of such atma, identity is pointed out with Brahman. So already siddhah. Another hetu for knower to be same as paratma is that the tenability of abidance in fearlessness as said by Sruti. It is explained. It is terse bhashya here. How fearlessness? Knower if he does not see anything other than himself, then alone abhaya is possible. Anyat here is world or Lord in the form of jagat. Jagat if different, Lord also naturally is different. Cause of fear, Isvara, is not something different from me and I do not see him as separate. If something is there, due to pravritti in food etc for a jnani, (he sees idli as something separate from him and that is why he wants to make it one with him.) and he has to deal with his body, mind etc. That is explained. Anyat is born of avidya and so by vidya it is known as non-entity. Other is avastu iti. When there is no second thing, then alone fearlessness is possible. If that second thing is set up only by avidya, then alone vidvan will not see as something second and real. It does not mean he will see the world. Perception of world does not establish duality. Avidya alone establishes duality. The existence of second moon which is not seen by one who has no cataract but who has eyes even though it is seen by one who has cataract. Second moon is seen where it is not. Similarly, where there is no dvaitam, if one sees it, it is called duality, the second thing and that duality is unreal which is not seen by one has no cataract of ignorance. The existence of duality is for one who has ignorance.

नैवं न गृह्यते इति चेत् (यथा तिमिराख्यदोषरहितचक्षुष्मता द्वितीयः चन्द्रः न गृह्यते एवं द्वैतं विदुषा न गृह्यते इति न। किं तु गृह्यते एव, अन्यथा विदुषः शास्त्रार्थोपदेशादौ प्रवृत्त्यभावप्रसङ्गात् इत्यर्थः।) । न। (व्यवहारकाले विदुषा तद्ग्रहणे अपि समाध्यवस्थायाम् अग्रहणात्, अविद्वत्साधारण्येन सुषुप्तौ अग्रहणाच्च, न वैषम्यमित्याशयेन परिहरति - न इति।) सुषुप्तसमाहितयोः अग्रहणात्। (सुषुप्तादौ द्वैताग्रहणं द्वैतासत्वप्रयुक्तं न भवति इति शङ्कते - सुषुप्त इति) सुषुप्ते अग्रहणमन्यासक्तत्वादिति (preoccupied) (अन्ये आसक्तः। सच्चिदानन्द - विश्रान्त्यनुभव-व्यग्रमनस्तया) चेत् यथा इषुकारः इष्वासक्तमनस्तया इषुव्यतिरिक्तं विद्यमानमपि न पश्यति एवं विद्यमानमेव द्वैतं सुषुप्तौ समाधौ च न पश्यति इत्यर्थः)। न सर्वाग्रहणात् (इषुकारस्य हि सर्वाग्रहणं नास्ति, इषुग्रहणस्य एव सत्त्वात्, सुषुप्त्यादौ तु न कस्यापि विशेषस्य ग्रहणमस्ति, अतः द्वितीयचन्द्रस्य द्वैतस्य कदाचिद् अग्रहणात् असत्त्वमेव वक्तव्यमित्यर्थः) (An ataimirika not sees. So seen at sometimes is unreal) ।

Here a person who undergoes the operation of cataract, does not see. But even if I undergo study, and yet after that guru is seen, world is seen, duality is seen. A second thing is not seen iti it is not. Meaning second thing is seen even after study. Your stand is purely sahasam. It is not true. We have an arguement of vyabhicara or contradiction. Satyam is that which does not give up its nature. Where there is contradiction to this, there mithyatva is there. The world is now there, now not there, iti there is kadacitkatvam is there. Like in deep sleep and samadhi. See anvaya vyatireka for vyabhicara. In waking state I am there. In dream also I am. In deep sleep also I am. In dream and waking I become seer etc. This jagat is not there in sleep. Variable is jagat. So it is mithya. Subject-object duality is not there in atma because it is not there in sleep. In upasanta state also it is not there.

No. In the sleep (which is familiar to him) he does not see because he is occupied with something else. Like archer is dead to the world when he is aiming. No. Archer has something to see that is target. If he does not see target, then what is aim? He is aware of arrow, its direction and target. We can say he does not see anything else. When Bhima was asked by Drona I see tree branch, and bird. Another say I see branch and bird. Third I see bird. Arjuna says I see only eye. In sleep what is it you are looking? What is your target? My target is sleep. That is until you sleep. Your illustration is wrong. Archer himself is not there. Seer himself is not there. All visehsas are gone. Jagrat and svapna has vishaya-vishayi sambandha. That relationship is not there in deep sleep state. So that sambandha is incidental. I assume the status and give up the status due to certain factors. We are not concerned with it. It is maya srishti. Here we are talking realities.

(ननु द्वैतस्य सुषुप्तादौ चेदनुपलम्भात् असत्वं तर्हि जाग्रदादौ उपलम्भात् सत्वेन किं न स्यात् इति शङ्कते - जाग्रत्स्वप्नयोः इति) जाग्रत्स्वप्नयोः अन्यस्य ग्रहणात् सत्वमेवेति चेत्। न। (उपलभ्यमानत्वमात्रं न सत्वप्रयोजकम्, तथा सति शुक्तिरूप्यद्वितीयचन्द्रादेरपि सत्वप्रसङ्गात्, किं तु बाधायोग्यत्वादिकमन्यदेव सत्वप्रयोजकम्, तच्च द्वैतस्य नास्ति नेह नानास्ति किञ्चन इत्यादौ सहस्रशः बाधदर्शनात् इत्यभिप्रेत्य द्वैतस्य शुक्तिरूप्यादेरिव अन्वयव्यतिरेकाभ्यां अविद्याकार्यत्वं दर्शयति - न, अविद्याकृतत्वादिति।) अविद्याकृतत्वात् जाग्रत्स्वप्नयोः। (सङ्ग्रहं विवृणोति - यदन्यग्रहणं इति) यदन्यग्रहणं (अन्यदिति ग्रहणम्) (यदन्यत्वेन गृह्यमाणं जगत् इत्यर्थः) जाग्रत्स्वप्नयोः तदविद्याकृतम्। (अन्वयमाह - अविद्याभावे इति) अविद्याभावे भावात् (अविद्या-अभावे अभावात्) (मुक्तौ अविद्यायाः अभावे जगतः अभावादिति व्यतिरेकः बहिरेव द्रष्टव्यः) । (ननु अविद्यायां सत्यां गृह्यमाणं द्वैतं यदि असत् तर्हि सुषुप्ते स्वयमेव प्रकाशमानं अद्वैतमपि परमार्थः न स्यात्, तदाप्यविद्यायाः सत्वादिति मत्वा शङ्कते - सुषुप्ते इति) सुषुप्ते अग्रहणमपि (न विद्यते ग्रहणं स्वेन अन्येन वा यस्य तदग्रहणं स्वयंज्योतिःस्वभावमद्वैतमिति यावत्।) अविद्याकृतमिति चेत्। (अविद्याकालीनस्याप्यद्वैतस्य न कल्पितत्वं अन्यानपेक्षस्वभावत्वात् इति परिहरति - नेति) न। स्वाभाविकत्वात्[५२]। (संगृहीतमर्थं दृष्टान्तपूर्वकं विवृणोति - द्रव्यस्य हि इत्यादिना) द्रव्यस्य हि तत्वम्

[52] That which depends on something for its existence is not svabhavika.

अविक्रिया (ब.व्रीहि) परानपेक्षत्वात् (लोके प्रसिद्धस्य मृदादिद्रव्यस्य अविक्रिया यत्कुलालादिकारकैरविकृतं मृत्स्वरूपमस्ति तत्तस्य तत्वं अनृतविलक्षणं स्वरूपं उक्तकारकानपेक्षत्वात्, तस्यैव मृदादिद्रव्यस्य या विक्रिया घटादिविकारावस्था सा तस्य अतत्त्वम् अनृतं रूपमित्यर्थः)। विक्रिया (विकारात्मकं जगत्) न तत्वम्। परापेक्षत्वात्। न हि कारकापेक्षं वस्तुनः तत्वम् (कारकापेक्षं विकारजातं वस्तुनः मृदादेः तत्वं वास्तवं रूपं न भवति, कादाचित्कत्वात् शुक्तिरूप्यादिवत् इत्यर्थः) । सतो विशेषः कारकापेक्षः (A specific state of sat depends on karaka like waking)। विशेषश्च विक्रिया। जाग्रत्स्वप्नयोः च ग्रहणं (गृह्यमाणार्थकम्) विशेषः (This visesha alone is perceived in waking and dream)। यद्धि यस्य नान्यापेक्षं स्वरूपं तत्तस्य तत्वम्। यदन्यापेक्षं न तत्त्वम्। अन्याभावे अभावात्। तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्ते विशेषः (सतः आत्मनः)।

Suppose you say - in sleep duality is not there so it is not real. In waking it is there, therefore it is there and real. Both are in the same boat. No You are in leaking boat. I have two states to prove dvaitam. You have only one state viz sleep to prove advaitam. Again in sleep you cannot argue. In waking I can argue. Not in sleep. So it is more real. Better to take dvaitam as real. Because I have to deal with the world. Even sleep also I have to deal. You need not deal with sleep. I am your neighbour. I have to deal with you. No. The duality in waking is set up by avidya. Because does atma wake up or dream or sleep? Then for whom is the waking and dream. Waking itself is avidya born. Is waking born of ignorance? If so, ignorance removed, world should go away. So it is Isvara's creation. Yadanyagrahanam. I am different from this object - this grahanam in waking and dream is born of avidya. Anyat iti grahanam is anyagrahanam. The triputi of knower etc is one adhishthanam Brahman. This is also important argument. That is, not seeing the world also is set up by avidya. Why not we say so? Avashtha avacchinna atma is due to avidya. Waking state atma is avastha avacchinna. So too sleep atma also. Agrahanam also is due to avidya and hence not true. Avasthayah avisesha is there. No. Advaita in sleep is svabhavika, it is not avidya karya. Atma becomes subject due to avidya. In sleep avidya does not do any thing in sleep. Atma alone is there as subject is not experienced. So not aviyda kritam.

The truth or svarupam of dravya or any substance like clay etc is changeless. Avikriya is not undergoing change. Being pot, it has no avikriya. Depending on anything else is not tattvam. In sleep there is vastu alone as it is without having undergone any change. Satah viseshah. Brahmanah, of Brahman vikriya is visesha. Karaka apekshah is vikriya. How did this vikriya take place? It is by karaka vyapara. But what obtains in sleep is not dependent on any karaka. Yat hi yasya.. Sweetness of sugar not depends on anything whereas coffee is not sweet but depends on sugar for its sweetness. No sugar, coffee is not sweet. So dvaitagrahanam is not nature of atma. Sushupte atmanah na viseshah. In waking there is visesha because set up by avidya. In sleep it is not because not set up by avidya.

(एवंवित् अन्यः इति पक्षे) येषां पुनः ईश्वरः (परमार्थतः) अन्यः आत्मनः (पञ्चमी), कार्यं च अन्यत्, तेषां भयानिवृत्तिः (भयहेतोः अन्यस्य ईश्वरस्य सत्वादित्यर्तः) भयस्य अन्यनिमित्तत्वात्। (परमार्थतः अन्यस्यापि सतः ईश्वरस्य विद्यया नाशसंभवात् स्यादेव भयनिवृत्तिः इति। नेत्याह - सतश्च इति) सतश्च अन्यस्य आत्महानानुपपत्तिः (स्वरूपनाशः)। (तत्र दृष्टान्तमाह - न च असतः इति) न च असतः (शशशृङ्गादेः) आत्मलाभः (उत्पत्तिः)। (ननु ईश्वरस्य प्राणिकर्मसापेक्षस्य एव अस्माभिः भयहेतुत्वमुपेयते न सत्तामात्रेण, विदुषस्तु कर्माभावाद् अभयं भविष्यति इति शङ्कते - सापेक्षस्य इति) सापेक्षस्य अन्यस्य भयहेतुत्वमिति चेत्। न। तस्यापि तुल्यत्वात्। यद्धर्माद्यन्यत् सहायभूतं नित्यमनित्यं वा निमित्तमपेक्ष्य अन्यद्भयकारणं स्यात्। तस्यापि तथाभूतस्य आत्महानाभावात् (ईश्वरस्य इव धर्मादेः अपि आत्महानं न संभवति, परमार्थसत्यत्वात्) भयानिवृत्तिः। आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्र अनाश्वासः एव त्वत्पक्षे।

In whose contention, again, Lord is different really from the standpoint of atma. Not only that. All other bhedas also. A clean set up for fear is there now. Lord is going to get him. That is how Lord is presented. I was drowning. I saw a log of wood and I grabbed. It started grabbing. Now he has a doubt whether it has hands. It is not log, but bear. Place of refuge becomes bhaya karanam. For them, no freedom from fear. You are in the form of sat. No other existent thing is going to harm you. Self destruciton is not possible if self is real. Asatah - if you are asat, you are not going to gain self. If sat, no destruction of self.

Bhaya hetu is not Lord. But by my own punya and papa, he becomes bhaya hetu. Isvara depending on something becomes source of fear. If he shows his grace, I can become free from fear. No. That dharma also paramartha satyam, if everything is satyam. Tulyatvat is explained. Isvara can be cause of fear based on nimitta. Nimitta is karma which is perishable. Of that dharma etc, he cannot completely eliminate. He will not turn nelson's eye to your karma. Even if real, karma can go away. No It is not possible. Real cannot become unreal. And vice versa. So there will be no trust in anything. Because of vyavaharika satta, there is visvasa.

एकत्वपक्षे पुनः सनिमित्तस्य संसारस्य अविद्याकल्पितत्वाद् अदोषः।

If there is a real difference between jiva and isvara, or that bheda is set up by ignorance alone. If kalpita, then it will go when ignorance is gone. If it is real, all problems come. Nothing can disappear. So bhaya karanam asti. Your own guilt is there and you are afraid that you are going to be punished. If because of Isvara's grace, all my punya and papa disappear, then I have no bhaya karnam. Because Lord will not be a source of fear. But that is not possible because if jiva is real, his punya and papa also real. If you say punya and papa is anitya, that anitya result of course will go. But there is big accumulated bag of sancita is there. If all will go, then sat becomes asat. Then unreal also can become real. Then you cannot believe

anything. In your paksha therefore no asvasa. In ekatva pakshe, abheda between jiva and isvara, (jagat is included in Lord) (It is not one god sitting in a place). It is not oneness of god and all other gods are not gods. That which is cause of samsara is sanimitta samsara. Nimitta is ignorance. When nimitta goes away, naimittika also goes away like flower is cause for redness. So crystal has not changed. So abheda on elimination of avidya. Even when not gone, it is abheda. You think it is true.

तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य न आत्मलाभः नाशो वा अस्ति।

Suppose you say samsara is avidya kalpita. Before it was not. Now it is due to avidya. Asat come to sat. Svabhava vaiparitya defect takes place. He is trying to judo. It is a martial art. You do not do anything. He uses his force to function against him. Like cutting to four a fast ball. You stop the person and he falls. Saying the same thing back. No. You have forgotten avidya krtatvam. A second moon is seen by this defective eyed person. That moon does not come into being. Nor it goes away later. Bheda neither came nor went. Bheda drshti alone went. Avidyavan alone sees.

विद्याविद्ययोः तद्धर्मत्वमिति चेत्। न (कल्पितयोः सामानाधिकरण्यमात्रं अपेक्षितम्। न तु धर्मत्वमपि। तच्च न कल्पितयोः अनुपपन्नम्। प्रत्युत वेद्यत्वात् रूपादिवत् आत्मधर्मत्वं नास्ति इति अनुमातुं शक्यते।) । प्रत्यक्षत्वात्। विवेकाविवेकौ रूपादिवत् प्रत्यक्षौ उपलभ्येते अन्तःकरणस्थौ।

He gets up alone. Knowledge and ignorance has the nature of being the attribute of atma - why can not we say - Ignorance is for whom? For paratma. So too jnanam. So dharmavan atma. Brahman is nirgunam. Who told avidya is dharma of atma? It is kalpita on atma. It is kalpita dharma. It was never bound before. Before teaching, atma is bound. Then what should be the teaching? Bound came to guru. His upadesa should be as the vastu is and it is you are bound. He does not say that. He says that you are free because you are satyam jnanam anantam. From the vision of sruti, even when he is bound, atma is not bound. Then only tat tvam asi can be told. Avidya itself is kalpita. That kalpitatvam is pointed out, So it is mithya. Because you have bondage, sruti is constrained to say you have ajnanam. We are not trying to prove avidya's existence. We do not want to commit our energy for that purpose. Vastu alone is object of the sruti. Ignorance is known to you. So it is pratyaksha. No need for pramana. (Avidya belongs to whom? It belongs to the questioner. He goes ahead.) So what is kalpitam is mithya. Whatever is seen is kalpitam. Because subject-object is kalpita. This ignorance is sakshipratyaksha. Nityasuddha.. You are not able to see. So avidya asti. Atma-anatma-aviveka and viveka. Viveka and lack of it - agrahanam and anyatha grahanam - this is aviveka. Viveka is taking it as it is. They are abiding in mind. So they are perceptible like form. They are not dharma of atma. Not that they are away from atma.

न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वं। अविद्या च स्वानुभवेन निरूप्यते - मूढोऽहं अविविक्तं मम विज्ञानमिति।

Form like elephant being seen as existing cannot be the dharma of seer. It is prasiddha. But avidya is unlike form. No it is also perceived by oneself. 'I am confused' iti My knowledge is not clear. Agrahanam and anyatha grahanam both are there. It is experience. It is pramanam. All experiences are sakshi pratyaksham.

तथा विद्याविवेकः अनुभूयते, उपदिशति च अन्येभ्यः आत्मनः विद्यां बुद्ध्वा। तथा अन्ये अवधारयन्ति (उपपत्तिभिः) ।

Similarly, vidya viveka is experienced by acarya. It is clear to him and he teaches also to others. Atma does not say I know. He teaches after knowing. The student also recognise and ascertain the same thing in the same manner. Therefore, like all names and forms are kalpita, so to knowledge and ignorance also kalpita.

तस्मात् नामरूपपक्षस्यैव (नामरूपान्तर्गत-अन्तःकरणस्य एव) विद्याविद्ये। नामरूपे च अनात्मधर्मौ। नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म (छा ८.१४.१) (ते नामरूपे यस्मात् भिन्ने तत् ब्रह्म) इति श्रुत्यन्तरात्। (चिन्मात्रतन्त्रः अनादिरनिर्वचनायाविद्यान्तःकरणरूपेण परिणमते तच्चान्तःकरणं तामस-सात्त्विक-अवस्थाभेदेन भ्रान्तिसम्यग्ज्ञानाकारेण परिणमते तस्मिन् प्रतिबिम्बितः चिद्धातुः स्वोपाधिधर्मेण एव भ्रान्तः सम्यग्दर्शी इति च व्यवह्रियते न तत्वतः विद्याविद्यावत्त्वम् इत्याह - ते च इति) ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते। न परमार्थतो विद्यमाने ।

Let name and form be dharma of atma. He does not leave. No it is not so. Like the name and form of pot are the dharma of clay. If clay dharma, then knock off pot. You will have no name and form but only clay. So name and form are incidental to clay. So he quotes a sruti. Those name and form are different from whom, that is the nirvahita, sustainer of name and form and it is Brahman. (yasmat bhinne namarupe, tad brahma. Namarupayoh nirvahita. Then Brahman is asraya of name and form like chair asraya for me. What is that nirvahita therefore is explained. This name and form (tat te tani) is not real. Kalpita. So no asraya-asrita relation. Like day and night is kalpita in sun. It is from your standpoint. He is always up. Bhashyakara time it is known. They do not exist in reality.

(सच्चिदानन्द - कोऽयं एवंवित् परामृष्टः इति एतत् विमृश्य निर्धारितम्, पर एवायमेवंवित् नान्यः इति। अथेदानीं कथं संक्रामति इत्येतन्निर्णेतुकामः पूर्ववादिशङ्काम् अभेदपक्षगतामुत्थापयति - अभेदे इति) अभेदे एतमानन्दमयमात्मानमुपसङ्क्रामति इति कर्मकर्तृत्वानुपपत्तिः इति चेत् (सच्चिदानन्द - कथं स एव स्वमात्मानमुपसंक्रामेत् इति शङ्कितुराशयः)। न। विज्ञानमात्रत्वात् संक्रमणस्य। (सच्चिदानन्द - अस्यैव वाक्यस्य विवरणम् - न जलूकावत् इति) (आत्मतया गृहीतस्य ज्ञानेन आनन्दमयान्तस्य बाधः उपसङ्क्रमणम्) न जलूकावत् संक्रमणमिह उपदिश्यते। किं तर्हि विज्ञानमात्रं संक्रमणश्रुतेः अर्थः।

The meaning of upasamkramana is gaining as abhedarupa. The karta and karma is there. Both should be different. If abheda, then this problem is there. Second case is there. Like reaches

village. Atmanam is there. No. It is like the meaning of apnoti in introduction. It talks of knowledge alone. Gaining is purely in the form of jnanam. Any gatyartha dhatu has that meaning. Did you get it? No. Her getting is in buddhi. I am not giving something. In Tamil also - did it enter. That anupapatti is mangalam. Gain is purely in the form of knowledge. It is only elimination of ignorance. A leech what does it do? From one grass to another it goes. It always holds the second one and pulls itself up. Upasankramanam is not like this. Evamvit does not do like that. The meaning of sankramanam is only knowledge.

(सच्चिदानन्द - पूर्ववादी शङ्कते - ननु इति) ननु मुख्यमेव संक्रमणं श्रूयते - उपसंक्रामति इति चेत् (सच्चिदानन्द - पादविक्षेपकर्मणः क्रामतेः उपोपसृष्टस्य गमनपूर्वकप्राप्तिरेव मुख्यार्थः। तं विहाय किमिति गौणः अर्थः कल्प्यते। मुख्यार्थस्वीकारेण हि अस्माल्लोकात् प्रेत्य संक्रामति इति मुख्यार्थानुगमष्ट अनुगृह्येत।)। न। अन्नमये अदर्शनात् न मुख्यमेव संक्रमणम् (सच्चिदानन्द - एतमानन्दमयमात्मानमुपसंक्रामति इति इहस्थस्य एव आनन्दमयात्मनः संक्रमणकर्मत्वेन श्रूयमाणत्वात्। न च बाह्याल्लोकात् आगत्य तत्प्राप्तिरभिप्रेता स्यात्। तद्-अदर्शनात् इत्यभिप्रायः)। (अदर्शनमेव स्पष्टयति - न हि इति) न हि अन्नमयमुपसंक्रामतः बाह्याद् अस्माल्लोकात् जलूकावत् संक्रमणं (शरीरस्थस्य) दृश्यते, अन्यथा वा (प्रवेशः इव)। (सच्चिदानन्द - अन्नमयमात्मानमुपसंक्रामति इत्यत्र तावत् संक्रमणं प्राप्तिरिति नावकल्पते। न हि अस्माल्लोकात् बाह्यात् प्रेत्य संक्रामति इत्यत्र शरीरमेतत्प्राप्य बाह्यालोकमाश्रयान्तरं मुञ्चतीति वा, शाखामृगवत् ततः अत्र चङ्क्रमते इति वा, नीडमिव पक्षी प्रविशति इति वा शक्यं कल्पयितुम्। अन्नमये एव स्थितस्य कथमपि तत्संक्रमणानुपपत्तेः इत्यभिप्रायः।)

